# Dharmapadam Sanskrit

# ધર્મપદમ્

## Document Information

Text title : dharmapada

File name : dharmapada.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Traditional

Transliterated by : Digitized by a team of volunteers working for http://malayalamebooks.org/

Proofread by : Daksha

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# ધર્મપદમ્

૧. યમકવર્ગઃ પ્રથમઃ

મનઃપૂર્વઙ્ગમા ધર્મા મનઃશ્રેષ્ઠા મનોમયાઃ ।
મનસા ચેત્પ્રદુષ્ટેન ભાષતે વા કરોતિ વા ।
તતો એનં દુઃખમન્વેતિ ચક્રમિવ વહતઃ પદમ્ ॥ ૧॥

મનઃપૂર્વઙ્ગમા ધર્મા મનઃશ્રેષ્ઠા મનોમયાઃ ।
મનસા ચેત્પ્રસન્નેન ભાષતે વા કરોતિ વા ।
તત એનં સુખમન્વેતિ છાયેવાનપાયિની ॥ ૨॥

અક્રોશિત્ માં અવધી માં અજૈષીત્ માં અહાર્ષીત્ મે ।
યે ચ તદુપનહ્યન્તિ વૈરં તેષાં ન શામ્યતિ ॥ ૩॥

અક્રોશિત્ માં અવધીત્ માં અજૈષીત્ માં અહાર્ષીત્ મે ।
યે તન્નોપનહ્યન્તિ વૈરં તેષૂપશામ્યતિ ॥ ૪॥

નહિ વૈરેણ વૈરાણી શામ્યન્તીહ કદાચન ।
અવૈરેણ ચ શામ્યન્તિ એષ ધર્મઃ સનાતનઃ ॥ ૫॥

પરે ચ ન વિજાનન્તિ વયમત્ર યંસ્યામઃ ।
યે ચ તત્ર વિજાનન્તિ તતઃ શામ્યન્તિ મેધગાઃ ॥ ૬॥

શુભમનુપશ્યન્તં વિહરન્તમિન્દ્રિયેષુ અસંવૃતમ્ ।
ભોજનેऽમાત્રાજ્ઞં કુસીદં હીનવીર્યમ્ ।
તં વૈ પ્રસહતિ મારો વાતો વૃક્ષમિવ દુર્બલમ્ ॥ ૭॥

અશુભમનુપશ્યન્તં વિહરન્તં ઇન્દ્રિયેષુ સુસંવૃતમ્ ।
ભોજને ચ માત્રાજ્ઞં શ્રદ્ધમારાબ્ધવીર્યમ્ ।
તં વૈ ન પ્રસહતે મારો વાતઃ શૈલમિવ પર્વતમ્ ॥ ૮॥

અનિષ્કષાયઃ કાષાયં યો વસ્ત્રં પરિધાસ્યતિ ।

અપેતો દમસત્યાભ્યાં ન સ કાષાયમર્હતિ ॥ ૯॥

યશ્ચ વાન્તકષાયઃ સ્યાત્ શીલેષુ સુસમાહિતઃ ।
ઉપેતો દમ-સત્યાભ્યાં સ વૈ કાષાયમર્હતિ ॥ ૧૦॥

અસારે સારમતયઃ સારે ચાસારદર્શિનઃ ।
તે સારં નાધિગચ્છન્તિ મિથ્યાસઙ્કલ્પગોચરાઃ ॥ ૧૧॥

સારં ચ સારતો જ્ઞાત્વા અસારં ચ અસારતઃ ।
તે સારં અધિગચ્છન્તિ સમ્યક્-સઙ્કલ્પ-ગોચરાઃ ॥ ૧૨॥

યથાગારં દુશ્છન્નં વૃષ્ટિઃ સમતિવિધ્યતિ ।
એવં અભાવિતં ચિત્તં રાગઃ સમતિવિધ્યતિ ॥ ૧૩॥

યથાગારં સુચ્છન્નં વૃષ્ટિર્ન સમતિ વિધ્યતિ ।
એવં સુભાવિતં ચિત્તં રાગો ન સમતિ વિધ્યતિ ॥ ૧૪॥

ઇહ શોચતિ પ્રેત્ત્ય શોચતિ પાપકારી ઉભયત્ર શોચતિ ।
સ શોચતિ સ વિહન્યતે દૃષ્ટ્વા કર્મ ક્લિષ્ટમાત્મનઃ ॥ ૧૫॥

ઇહ મોદતે પ્રેત્ત્ય મોદતે કૃતપુણ્ય ઉભયત્ર મોદતે ।
સ મોદતે સ પ્રમોદતે દૃષ્ટ્વા કર્મવિશુદ્ધિમાત્મનઃ ॥ ૧૬॥

ઇહ તપ્યતિ પ્રેત્ત્ય તપ્યતિ પાપકારી ઉભયત્ર તપ્યતિ ।
પાપં મે કૃતમિતિ તપ્યતિ ભૂયસ્તપ્યતિ દુર્ગતિંગતઃ ॥ ૧૭॥

ઇહ નન્દતિ પ્રેત્ય નન્દતિ કૃતપુણ્ય ઉભયત્ર નન્દતિ ।
પુણ્યં મે કૃતમિતિ નન્દતિ ભૂયો નન્દતિ સુગતિંગતઃ ॥ ૧૮॥

બહ્વીમપિ સંહિતાં ભાષમાણઃ ન તત્કરો ભવતિ નરઃ પ્રમત્તઃ ।
ગોપ ઇવ ગા ગણયન્ પરેષાં ન ભાગવાન્ શ્રામણ્યસ્ય ભવતિ ॥ ૧૯॥

અલ્પમપિ સંહિતાં ભાષમાણો ધર્મસ્ય ભવત્યનુધર્મચારી ।
રાગં ચ દ્વેષં ચ પ્રહાય મોહં સમ્યક્ પ્રજાનન્ સુવિમુક્તચિત્તઃ ।
અનુપાદદાનઃ ઇહ વાઽમુત્ર વા સ ભાગવાન્ શ્રામણ્યસ્ય ભવતિ ॥ ૨૦॥

॥ ઇતિ યમકવર્ગઃ સમાપ્તઃ ॥

---

૨. અપ્રમાદવર્ગઃ દ્વિતીયઃ

અપ્રમાદોઽમૃતપદં પ્રમાદો મૃત્યોઃ પદમ્ ।
અપ્રમત્તા ન મ્રિયન્તે યે પ્રમત્તા યથા મૃતાઃ ॥ ૧ ॥

એતં વિશેષતો જ્ઞાત્વાઽપ્રમાદે પણ્ડિતા ।
અપ્રમાદે પ્રમોદન્ત આર્યાણાં ગોચરે રતાઃ ॥ ૨ ॥

તે ધ્યાયિનઃ સાતતિકા નિત્ત્યં દૃઢપરાક્રમાઃ ।
સ્પૃશન્તિ ધીરા નિર્વાણં યોગક્ષેમં અનુત્તરમ્ ॥ ૩ ॥

ઉત્થાનવતઃ સ્મૃતિમતઃ શુચિકર્મણો નિશમ્યકારિણઃ ।
સંયતસ્ય ચ ધર્મજીવનોઽપ્રમત્તસ્ય યશોભિવર્દ્ધતે ॥ ૪ ॥

ઉત્થાનેનાઽપ્રમાદેન સંયમેન દમેન ચ ।
દ્વીપં કુર્વન્તિ મેધાવી યં ઓઘો નાભિકિરતિ ॥ ૫ ॥

પ્રમાદમનુયુઞ્જન્તિ બાલા દુર્મેધસો જના ।
અપમાદં ચ મેધાવી ધનં શ્રેષ્ઠમિવ રક્ષતિ ॥ ૬ ॥

મા પ્રમાદમનુયુઞ્જીત મા કામરતિસંસ્તવમ્ ।
અપ્રમત્તો હિ ધ્યાયન્ પ્રાપ્નોતિ વિપુલં સુખમ્ ॥ ૭ ॥

પ્રમાદમપ્રમાદેન યદા નુદતિ પણ્ડિતઃ ।
પ્રજ્ઞાપ્રાસાદમારુહ્ય અશોકઃ શોકિનીં પ્રજાગ્ ।
પર્વતસ્થ ઇવ ભૂમિસ્થાન્ ધીરો બલાન્ અવેક્ષતે ॥ ૮ ॥

અપ્રમત્તઃ પ્રમત્તેષુ સુપ્તેષુ બહુજાગરઃ ।
અબલાશ્વમિવ શીઘ્રાશ્વો હિત્ત્વા યાતિ સુમેધાઃ ॥ ૯ ॥

અપ્રમાદેન મઘવા દેવાનાં શ્રેષ્ઠતાં ગતઃ ।
અપ્રમાદં પ્રશંસન્તિ પ્રમાદો ગર્હિતઃ સદા ॥ ૧૦ ॥

અપ્રમાદરતો ભિક્ષુઃ પ્રમાદે ભયદર્શી વા ।
સાયોજનં અણું સ્થૂલં દહન્નગ્નિરિવ ગચ્છતિ ॥ ૧૧ ॥

અપ્રમાદરતો ભિક્ષુઃ પ્રમાદે ભયદર્શી વા ।
અભવ્યઃ પરિહાણાય નિર્વાણસ્યૈવ અન્તિકે ॥ ૧૨ ॥

॥ ઇતિ અપ્રમાદવર્ગઃ સમાપ્તઃ ॥

---

## ૩. ચિત્તવર્ગસ્તૃતીયઃ

સ્પન્દનં ચપલં ચિત્તં દુરક્ષ્યં દુર્નિવાર્યમ્ ।
ઋજું કરોતિ મેધાવી ઇષુકાર ઇવ તેજનમ્ ॥ ૧॥

વારિજં ઇવ સ્થલે ક્ષિપ્તં ઉદકસ્યૌકત ઉદ્ભૂતઃ ।
પરિસ્પન્દત ઇદં ચિત્તં મારધેયં પ્રહાતુમ્ ॥ ૨॥

દુર્નિગ્રહસ્ય લઘુનો યત્ર-કામ-નિપાતિનઃ ।
ચિત્તસ્ય દમનં સાધુ ચિત્તં દાન્તં સુખાવહમ્ ॥ ૩॥

સુદુર્દૃશં સુનિપુણં યત્ર-કામનિપાતિ ।
ચિત્તં રક્ષેન્મેધાવી ચિત્તં ગુપ્તં સુખાવહમ્ ॥ ૪

દૂરઙ્ગમં એકચરં અશરીરં ગુહાશયમ્ ।
યે ચિત્તં સંયંસ્યન્તિ મોક્ષ્યન્તે મારબન્ધનાત્ ॥ ૫॥

અનવસ્થિતચિત્તસ્ય સદ્ધર્મં અવિજાનતઃ ।
પરિપ્લવપ્રસાદસ્ય પ્રજ્ઞા ન પરિપૂર્યતે ॥ ૬॥

અનવસ્રુત ચિત્તસ્ય અનન્વાહતચેતસઃ ।
પુણ્યપાપપ્રહીણસ્ય નાઽસ્તિ જાગ્રતો ભયમ્ ॥ ૭॥

કુંભોપમં કાયમિમં વિદિત્વા નગરોપમં ચિત્તમિદં સ્થાપયિત્ત્વા ।
યુધ્યેત મારં પ્રજ્ઞાયુધેન જિતં ચ રક્ષેદનિવેશનઃ સ્યાત્ ॥ ૮॥

અચિરં વતાયં કાયઃ પૃથિવીં અધિશેષ્યતે ।
ક્ષુદ્રોઽપેતવિજ્ઞાનો નિરર્થં ઇવ કલિઙ્ગરમ્ ॥ ૯॥

દ્વિટ્ દ્વિષં યત્ કુર્યાત્ વૈરી વા પુનર્વૈરિણમ્ ।
મિથ્યાપ્રણિહિતં ચિત્તં પાપીયાંસં એનં તતઃ કુર્યાત્ ॥ ૧૦॥

ન તત્ માતાપિતરૌ કુર્યાતાં અન્યે ચાપિ ચ જ્ઞાતિકાઃ ।
સમ્યક્પ્રણિહિતં ચિત્તં શ્રેયાંસં એનં તતઃ કુર્યાત્ ॥ ૧૧॥

॥ ઇતિ ચિત્તવર્ગઃ સમાપ્તઃ ॥

---

૪. પુષ્પવર્ગશ્ચતુર્થઃ

ક ઇમાં પૃથિવીં વિજેષ્યતે યમલોકં ચેમં સદેવકમ્ ।
કો ધર્મપદં સુદેશિતં કુશલઃ પુષ્પમિવ પ્રચેષ્યતિ ॥ ૧॥

શૈક્ષઃ પૃથવીં વિજેષ્યતે યમલોકં ચ ઇમં સદેવકમ્ ।
શૈક્ષો ધર્મપદં સુદેશિતં કુશલઃ પુષ્પમિવ પ્રચેષ્યતિ ॥ ૨॥

ફેનોપમં કાયમિમં વિદિત્વા મરીચિધર્મં અભિસંબુધાનઃ ।
છિત્વા મારસ્ય પ્રપુષ્પકાણિ અદર્શનં મૃત્યુરાજસ્ય ગચ્છેત્ ॥ ૩॥

પુષ્પાણિ હ્યેવ પ્રચિન્વન્તં વ્યાસક્તમનસં નરમ્ ।
સુપ્તં ગ્રામં મહોઘ ઇવ મૃત્યુરાદાય ગચ્છતિ ॥ ૪॥

પુષ્પાણિ હ્યેવ પ્રચિન્વન્તં વ્યાસક્તમનસં નરમ્ ।
અતૃપ્તમેવ કામેષુ અન્તકઃ કુરુતે વશમ્ ॥ ૫॥

યથાપિ ભ્રમરઃ પુષ્પં વર્ણગન્ધં અઘ્નન્ ।
પલાયતે રસમાદાય એવં ગ્રામે મુનિશ્ચરેત્ ॥ ૬॥

ન પરેષાં વિલોમાનિ ન પરેષાં કૃતાકૃતમ્ ।
આત્મનં એવ અવેક્ષેત કૃતાન્યકૃતાનિ ચ ॥ ૭॥

યથાપિ રુચિરં પુષ્પં વર્ણવદગન્ધકમ્ ।
એવં સુભાષિતા વાક્ સફલા ભવતિ કુર્વતઃ ॥ ૮॥

યથાપિ રુચિરં પુષ્પં વર્ણવત્ સગન્ધકમ્ ।
એવં સુભાષિતા વાક્ સફલા ભવતિ કુર્વતઃ ॥ ૯॥

યથાપિ પુષ્પરાશેઃ કુર્યાત્ માલાગુણાન્ બહૂન્ ।
એવં જાતેન મર્ત્યેન કર્ત્તવ્યં કુશલં બહુ ॥ ૧૦॥

ન પુષ્પગન્ધઃ પ્રતિવાતમેતિ ન ચન્દનં તગરમલ્લિકે વા ।
સતાઞ્ચ ગન્ધઃ પ્રતિવાતમેતિ સર્વા દિશઃ સત્પુરુષઃ પ્રવાતિ ॥ ૧૧॥

ચન્દનં તગરં વાપિ ઉત્પલં અથ વાર્ષિકી ।
એતેષાં ગન્ધજાતાનાં શીલગન્ધોઽનુત્તરઃ ॥ ૧૨॥

અલ્પમાત્રોઽયં ગન્ધો યોઽયં તગરચન્દની ।
યશ્ચ શીલવતાં ગન્ધો વાતિ દેવેષુ ઉત્તમઃ ॥ ૧૩॥

તેષાં સમ્પન્નશીલાનાં અપ્રમાદ-વિહારિણામ્ ।
સમ્યગ્જ્ઞાનવિમુક્ત્તાનાં મારો માર્ગં ન વિન્દતિ ॥ ૧૪॥

યતા સઙ્કારધાને ઉજ્ઝિતે મહાપથે ।

પદ્મં તત્ર જાયેત શુચિગન્ધં મનોરમમ્ ॥ ૧૫॥

એવં સઙ્કારભૂતે અન્ધભૂતે પૃથગ્જને ।
અતિરોચતે પ્રજ્ઞયા સમ્યક્-સંબુદ્ધ-શ્રાવકઃ ॥ ૧૬॥

॥ ઇતિ પુષ્પવર્ગઃ સમાપ્તઃ ॥

---

૫. બાલવર્ગઃ પઞ્ચમઃ

દીર્ઘા જાગ્રતો રાત્રિઃ દીર્ઘં શ્રાન્તસ્ય યોજનમ્ ।
દીર્ઘો બાલાનાં સંસારઃ સદ્ધર્મં અવિજાનતામ્ ॥ ૧॥

ચરન્ ચેત્ નાધિગચ્છેત્ શ્રેયાંસં સદૃશં આત્મનઃ ।
એકચર્યાં દૃઢં કુર્યાત્ નાઽસ્તિ બાલે સહાયતા ॥ ૨॥

પુત્રા મે સન્તિ ધનં મેઽસ્તિ ઇતિ બાલો વિહન્યતે ।
આત્મા હ્યાત્મનો નાઽસ્તિ કુતઃ પુત્રાઃ કુતો ધનમ્ ॥ ૩॥

યો બાલો મન્યતે બાલ્યં પણ્ડિતશ્ચાપિ તેન સ ।
બાલશ્ચ પણ્ડિતમાની સ વૈ બાલ ઇત્યુચ્યતે ॥ ૪॥

યાવજ્જીવમપિ ચેદ્ બાલઃ પણ્ડિતં પર્યુપાસતે ।
ન સ ધર્મં વિજાનાતિ દર્વી સૂપરસં યથા ॥ ૫॥

મુહૂર્ત્તમપિ ચેદ્ વિજ્ઞાઃ પણ્ડિતં પર્યુપાસતે ।
ક્ષિપ્રં ધર્મં વિજાનાતિ જિહ્વા સૂપરસં યથા ॥ ૬॥

ચરન્તિ બાલા દુર્મેધસોઽમિત્રેણૈવાત્મના ।
કુર્વન્તઃ પાપકં કર્મં યદ્ભવતિ કટુકફલમ્ ॥ ૭॥

ન તત્ કર્મ કૃતં સાધુ યત્ કૃત્ત્વાઽનુતપ્યતે ।
યસ્યાશ્રુમુખો રુદન્ વિપાકં પ્રતિસેવતે ॥ ૮॥

તચ્ચ કર્મં કૃતં સાધુ યત્ કૃત્વા નાનુતપ્યતે ।
યસ્ય પ્રતીતઃ સુમન વિપાકં પ્રતિસેવતે ॥ ૯॥

મધ્વિવ મન્યતે બાલો યાવત્ પાપં ન પચ્યતે ।
યદા ચ પચ્યતે પાપં અથ બાલો દુઃખં નિગચ્છતિ ॥ ૧૦॥

માસે માસે કુશાગ્રેણ બાલો ભુઞ્જીત ભોજનમ્ ।

ન સ સંખ્યાતધર્માણાં કલામર્હતિ ષોડશીમ્ ॥ ૧૧॥

નહિ પાપં કૃતં કર્મ સદ્યઃ ક્ષીરમિવ મુચ્ચતિ ।
દહન્ બાલમન્વેતિ ભસ્મચ્છન્ન ઇવ પાવકઃ ॥ ૧૨॥

યાવદેવ અનર્થાય જ્ઞપ્તં બાલસ્ય જાયતે ।
હન્તિ બાલસ્ય શુક્લાંશં મૂર્દ્ધાનમસ્ય વિપાતયન્ ॥ ૧૩॥

અસદ્ ભવનમિચ્છેત્ પુરસ્કારં ચ ભિક્ષુષુ ।
આવાસેષુ ચૈશ્વર્યં પૂજાં પરકુલેષુ ચ ॥ ૧૪॥

મમૈવ કૃતં મન્યેતાં ગૃહિ-પ્રવ્રજિતાવુભૌ ।
મમૈવાતિવશાઃ સ્યાતાં કૃત્યાકૃત્યેષુ કષુ ચિત્ ।
ઇતિ બાલસ્ય સઙ્કુલ્પ ઇચ્છા માનશ્ચ વર્દ્ધતે ॥ ૧૫॥

અન્યા હિ લાભોપનિષદ્ અન્યા નિર્વાણગામિનિ ।
એવમેતદ્ અભિજ્ઞાય ભિક્ષુર્બુદ્ધસ્ય શ્રાવકઃ ।
સત્કારં નાભિનન્દેત્ વિવેકમનુબૃંહયેત્ ॥ ૧૬॥

॥ ઇતિ બાલવર્ગઃ સમાપ્તઃ ॥

---

૬. પણ્ડિતવર્ગઃ ષષ્ઠઃ

નિધીનામિવ પ્રવક્તારં યં પશ્યેત્ વર્જ્યદર્શિનામ્ ।
નિગૃહ્યવાદિનં મેધાવિનં તાદૃશં પણ્ડિતં ભજેત્ ।
તાદૃશં ભજમાનસ્ય શ્રેયો ભવતિ ન પાપીયઃ ॥ ૧॥

અવવદેદનુશિષ્યાત્ અસભ્યાચ્ચ નિવારયેત્ ।
સતાં હિ સ પ્રિયો ભવતિ અસતાં ભવત્યપ્રિયઃ ॥ ૨॥

ન ભજેત્ પાપકાનિ મિત્રાણિ ન ભજેત્ પુરુષાધમાન્ ।
ભજેત્ મિત્રાણિ કલ્યાણાનિ ભજેત પુરુષનુત્તમાન્ ॥ ૩॥

ધર્મપીતીઃ સુખં શેતે વિપ્રસન્નેન ચેતસા ।
આર્યપ્રવેદિતે ધર્મે સદા રમતે પણ્ડિતઃ ॥ ૪॥

ઉદકં હિ નયન્તિ નેતૃકા ઇષુકારા નમયન્તિ તેજનમ્ ।
દારું નમયન્તિ તક્ષકા આત્માનં દમયન્તિ પણ્ડિતાઃ ॥ ૫॥

શૈલો યથૈકઘનો વાતેન ન સમીર્યતે ।

એવં નિન્દાપ્રશંસાસુ ન સમીર્યન્તે પણ્ડિતાઃ ॥ ૬॥

યથાપિ હ્રદો ગંભીરો વિપ્રસન્નોઽનાવિલઃ ।
એવં ધર્માન્ શ્રુત્વા વિપ્રસીદન્તિ પણ્ડિતાઃ ॥ ૭॥

સર્વત્ર વૈ સત્પુરુષા વ્રજન્તિ ન કામકામા લપન્તિ સન્તઃ ।
સુખેન સ્પૃષ્ટા અથવા દુઃખેન નોચ્ચાવચં પણ્ડિતા દર્શયન્તિ ॥ ૮॥

નાત્મહેતોઃ ન પરસ્ય હેતોઃ ન પુત્રમિચ્છેન્ન ધનં ન રાષ્ટ્રમ્ ।
નેચ્છેદ્ અધર્મેણ સમૃદ્ધિમાત્મનઃ સ શીલવાન્ પ્રજ્ઞાવાન્ ધાર્મિકઃ સ્યાત્ ॥

૯॥

અલ્પકાસ્તે મનુષ્યેષુ યે જનાઃ પારગામિનઃ ।
અથેમા ઇતરાઃ પ્રજાઃ તીરમેવાનુધાવતિ ॥ ૧૦॥

યે ચ ખલુ સમ્યગાખ્યાતે ધર્મે ધર્માનુવર્ત્તિનઃ ।
તે જના પારમેષ્યન્તિ મૃત્યુધેયં સુદુસ્તરમ્ ॥ ૧૧॥

કૃષ્ણં ધર્મં વિપ્રહાય શુક્લં ભાવયેત્ પણ્ડિતઃ ।
ઓકાત્ અનોકં આગમ્ય વિવેકે યત્ર દુરમમ્ ॥ ૧૨॥

તત્રાભિરતિમિચ્છેત્ હિત્ત્વા કામાન્ અકિઞ્ચનઃ ।
પર્યવદાપયેત્ આત્માનં ચિત્તક્લેશૈઃ પણ્ડિતઃ ॥ ૧૩॥

યેષાં સંબોધ્યંગેષુ સમ્યગ્ચિત્તં સુભાવિતમ્ ।
આદાનપ્રતિનિઃસર્ગે અનુપાદાય યે રતાઃ ।
ક્ષીણાસ્રવા જ્યોતિષ્મન્તસ્તે લોકે પરિનિર્વૃતાઃ ॥ ૧૪॥

॥ ઇતિ પણ્ડિતવર્ગ સમાપ્તઃ ॥

---

૭. અર્હદ્વર્ગઃ સપ્તમઃ

ગતાધ્વનો વિશોકસ્ય વિપ્રમુક્તસ્ય સર્વથા ।
સર્વગ્રન્થપ્રહીણસ્ય પરિદાહો ન વિદ્યતે ॥ ૧॥

ઉદ્યુઞ્જતે સ્મૃતિમન્તો ન નિકેતે રમન્તે તે ।
હંસા ઇવ પલ્વલં હિત્ત્વા ઓકમોકં જહતિ તે ॥ ૨॥

યેષાં સન્નિચયો નાઽસ્તિ યે પરિજ્ઞાતભોજનાઃ ।

શૂન્યતોऽનિમિત્તશ્ચ વિમોક્ષો યેષાં ગોચરઃ ।
આકાશ ઇવ શકુન્તાનાં ગતિસ્તેષાં દુરન્વયા ॥ ૩॥

યસ્યાસ્રવાઃ પરિક્ષીણા આહારે ચ અનિઃસૃતઃ ।
શૂન્યતોऽનિમિત્તશ્ચ વિમોક્ષો યસ્ય ગોચરઃ ।
આકાશ ઇવ શકુન્તાનાં પદં તસ્ય દુરન્વયમ્ ॥ ૪॥

યસ્યેન્દ્રિયાણિ શમથં ગતાનિ અશ્વા યથા સારથિના સુદાન્તાઃ ।
પ્રહીણમાનસ્ય અનાસ્રવસ્ય દેવા અપિ તસ્ય સ્પૃહયન્તિ તાદૃશઃ ॥ ૫॥

પૃથિવીસમો ન વિરુધ્યતે ઇન્દ્રકીલોપમઃ તાદૃક્ સુવ્રતઃ ।
હ્રદ ઇવાપેતકર્દમઃ સંસારા ન ભવન્તિ તાદૃશઃ ॥ ૬॥

શાન્તં તસ્ય મનો ભવતિ વાક્ ચ કર્મ ચ ।
સમ્યગાજ્ઞાવિમુક્તસ્ય ઉપશાન્તસ્ય તાદૃશઃ ॥ ૭॥

અશ્રદ્ધોऽકૃતજ્ઞશ્ચ સન્ધિચ્છેદશ્ચ યો નરઃ ।
હતાવકાશો વાન્તાશઃ સ વૈ ઉત્તમ પુરુષઃ ॥ ૮॥

ગ્રામે વા યદિ વાऽરણ્યે નિમ્ને વા યદિ વા સ્થલે ।
યત્રાર્હન્તો વિહરન્તિ સા ભૂમી રામણીયકા ॥ ૯॥

રમણીયાન્યરણ્યાનિ યત્ર ન રમતે જનઃ ।
વીતરાગા રંસ્યન્તે ન તે કામગવેષિણઃ ॥ ૧૦॥

॥ ઇતિ અર્હદ્વર્ગઃ સમાપ્તઃ ॥

---

૮. સહસ્રવર્ગો અષ્ટમઃ

સહસ્રમપિ ચેદ્ વાચોऽનર્થપદસંહિતા ।
એકમર્થપદં શ્રેયો યત્ શ્રુત્ત્વોપશામ્યતિ ॥ ૧॥

સહસ્રમપિ ચેદ્ગાથા અનર્ત્થપદસંહિતા ।
એકં ગાથાપદં શ્રેયો યત્ શ્રુત્ત્વોપશામ્યતિ ॥ ૨॥

યશ્ચ ગાથાશતં ભાષેતાનર્થપદસંહિતાઃ ।
એકં ધર્મપદં શ્રેયો યત્ શ્રુત્ત્વોપશામ્યતિ ॥ ૩॥

યઃ સહસ્રં સહસ્રેણ સંગ્રામે માનુષાન્ જયેત્ ।
એકં ચ જયેદ્ આત્માનં સ વૈ સંગ્રામજિદુત્તમઃ ૪

આત્મા હ વૈ જિતઃ શ્રેયાન્ યા ચેયમિતરા પ્રજા ।
દાન્તાત્મનઃ પુરુષસ્ય નિત્યં સંયતચારિણઃ ॥ ૫॥

નૈવ દેવો ન ગન્ધર્વો ન મારઃ સહ બ્રહ્મણા ।
જિતં અપજિતં કુર્યાત્ તથારૂપસ્ય જન્તોઃ ॥ ૬॥

માસે માસે સહસ્રેણ યો યજેત શતં સમાન્ ।
એકં ચ ભાવિતાત્માનં મુહુર્ત્તમપિ પૂજયેત્ ।
સૈવ પુજના શ્રેયસી યચ્ચેદ્ વર્ષશતં હુતમ્ ॥ ૭॥

યશ્ચ વર્ષશતં જન્તુરગ્નિં પરિચરેત્ વને ।
એકં ચ ભાવિતાત્માનં મુહુર્ત્તમપિ પૂજયેત્ ।
સૈવ પૂજના શ્રેયસી યચ્ચેત્ વર્ષશતં હુતમ્ ॥ ૮॥

યત્ કિઞ્ચિદ્ ઇષ્ટં ચ હુતં ચ લોકે સંવત્સરં યજેત પુણ્યાપેક્ષઃ ।
સર્વમપિ તન્ન ચતુર્ભાગમેતિ અભિવાદના ઋજુગતેષુ શ્રેયસી ॥ ૯॥

અભિવાદનશીલસ્ય નિત્ત્યં વૃદ્ધાપચાયિનઃ ।
ચત્વારો ધર્મા વર્ધન્તે આયુર્વર્ણઃ સુખં બલમ્ ॥ ૧૦॥

યશ્ચ વર્ષશતં જીવેત્ દુઃશીલોઽસમાહિતઃ ।
એકાહં જીવિતં શ્રેયઃ શીલવતો ધ્યાયિનઃ ॥ ૧૧॥

યશ્ચ વર્ષશતં જીવેત્ દુષ્પ્રજ્ઞોઽસમાહિતઃ ।
એકાહં જીવિતં શ્રેયઃ પ્રજ્ઞાવતો ધ્યાયિનઃ ॥ ૧૨॥

યચ્ચ વર્ષશતં જીવેત્ કુસીદો હીનવીર્યઃ ।
એકાહં જીવિતં શ્રેયઃ વીર્યમારભતો દૃઢમ્ ॥ ૧૩॥

યશ્ચ વર્ષશતં જીવેત્ અપશ્યન્ ઉદયવ્યયં
એકાહં જીવિતં શ્રેયઃ પશ્યતઃ ઉદયવ્યયમ્ ॥ ૧૪॥

યશ્ચ વર્ષશતં જીવેત્ અપશ્યન્નમૃતં પદમ્ ।
એકાહં જીવિતં શ્રેયઃ પશ્યતોઽમૃતં પદમ્ ॥ ૧૫॥

યચ્ચ વર્ષશતં જીવેદપશ્યન્ ધર્મમુત્તમમ્ ।
એકાહં જીવિતં શ્રેયઃ પશ્યતો ધર્મમુત્તમમ્ ॥ ૧૬॥

॥ ઇતિ સહસ્રવર્ગઃ સમાપ્તઃ ॥

## ૯. પાપવર્ગઃ નવમઃ

અભિત્વરેત કલ્યાણે પાપાત્ ચિત્તં નિવારયેત્ ।
તન્દ્રિતં હિ કુર્વતઃ પુણ્યં પાપે રમતે મનઃ ॥ ૧॥

પાપં ચેત્ પુરુષઃ કુર્યાત્ ન તત્ કુર્યાત્ પુનઃ પુનઃ ।
ન તસ્મિન્ છન્દં કુર્યાત્ દુઃખઃ પાપસ્ય ઉચ્ચયઃ ॥ ૨॥

પુણ્યં ચેત્ પુરુષઃ કુર્યાત્ કુર્યાદેતત્ પુનઃ પુનઃ ।
તસ્મિન્ છન્દં કુર્યાત્ સુખઃ પુણ્યસ્ય ઉચ્ચયઃ ॥ ૩॥

પાપોઽપિ પશ્યતિ ભદ્રં યાવત્ પાપં ન પચ્યતે ।
યદા ચ પચ્યતે પાપં અથ પાપો પાપાનિ પશ્યતિ ॥ ૪॥

ભદ્રોઽપિ પશ્યતિ પાપં યાવત્ ભદ્રં ન પચ્યતે ।
યદા ચ પચ્યતે ભદ્રં અથ ભદ્રાણિ પશ્યતિ ॥ ૫॥

માઽવમન્યેત પાપસ્ય ન માં તદ્ આગમિષ્યતિ ।
ઉદબિન્દુનિપાતેન ઉદકુંભોઽપિ પૂર્યતે ।
બાલઃ પૂરયતિ પાપં સ્તોકં સ્તોકમપ્યાચિન્વન્ ॥ ૬॥

માઽવમન્યેત પુણ્યસ્ય ન માં તદ્ આગમિષ્યતિ ।
ઉદબિન્દુનિપાતેન ઉદકુંભોઽપિ પૂર્યતે ।
ધીરઃ પૂરયતિ પુણ્યસ્ય સ્તોકં સ્તોકમપ્યાચિન્વન્ ॥ ૭॥

વાણિગિવ ભયં માર્ગં અલ્પસાર્થો મહાધનઃ ।
વિષં જીવિતુકામ ઇવ પાપાનિ પરિવર્જયેત્ ॥ ૮॥

પાણૌ ચેદ્ વ્રણો ન સ્યાદ્ હરેત્ પાણિના વિષમ્ ।
નાઽવ્રણં વિષમન્વેતિ નાઽસ્તિ પાપં અકુર્વતઃ ॥ ૯॥

યોઽલ્પદુષ્ટાય નરાય દુષ્યતિ શુદ્ધાય પુરુષાયાઽનઙ્ગનાય ।
તમેવ બાલં પ્રત્યેતિ પાપં સૂક્ષ્મો રજઃ પ્રતિવાતમિવ ક્ષિપ્તમ્ ॥ ૧૦॥

ગર્ભમેક ઉત્પદ્યન્તે નિરયં પાપકર્મિણઃ ।
સ્વર્ગં સુગતયો યાન્તિ પરિનિર્વાન્ત્યનાસ્રવાઃ ॥ ૧૧॥

નાન્તરીક્ષે ન સમુદ્રમધ્યે ન પર્વતાનાં વિવરં પ્રવિશ્ય ।
ન વિદ્યતે સ જગતિ પ્રદેશો યત્રસ્થિતો મુચ્યેત પાપકર્મણઃ ॥ ૧૨॥

નાન્તરિક્ષે ન સમુદ્રમધ્યે ન પર્વતાનાં વિવરં પ્રવિશ્ય ।
ન વિદ્યતે સ જગતિ પ્રદેશો યત્રસ્થિતં ન પ્રસહેત મૃત્યુઃ ॥ ૧૩॥

॥ ઇતિ પાપવર્ગઃ સમાપ્તઃ ॥

---

૧૦. દણ્ડવર્ગઃ દશમઃ

સર્વે ત્રસ્યન્તિ દણ્ડાત્ સર્વે બિભ્યતિ મૃત્યોઃ ।
આત્માનં ઉપમાં કૃત્વા ન હન્યાત્ ન ઘાતયેત્ ॥ ૧॥

સર્વે ત્રસયન્તિ દણ્ડાત્ સર્વેષાં જિવિતં પ્રિયમ્ ।
આત્માનં ઉપમાં કૃત્વા ન હન્યાત્ ન ઘાતયેત્ ॥ ૨॥

સુખકામાનિ ભૂતાનિ યો દણ્ડેન વિહિનસ્તિ ।
આત્મનઃ સુખમન્વિષ્ય પ્રેત્ત્ય સ ન લભતે સુખમ્ ॥ ૩॥

સુખકામાનિ ભૂતાનિ યો દણ્ડેન ન હિનસતિ ।
આત્મનઃ સુખમન્વિષ્ય પ્રેત્ત્ય સ લભતે સુખમ્ ॥ ૪॥

મા વોચઃ પરુષં કિઞ્ચિદ્ ઉક્તાઃ પ્રતિવદેયુસ્ત્વામ્ ।
દુઃખા હિ સંરંભકથા પ્રતિદણ્ડાઃ સ્પૃશેયુસ્ત્વામ્ ॥ ૫॥

સ ચેત્ નેરયસિ આત્માનં કાંસ્યમુપહતં યથા ।
એષ પ્રાપ્તોઽસિ નિર્વાણં સંરંભસ્તે ન વિદ્યતે ॥ ૬॥

યથા દણ્ડેન ગોપાલો ગાઃ પ્રાજયતિ ગોચરમ્ ।
એવં જરા ચ મૃત્યુશ્ચાયુઃ પ્રાજયતઃ પ્રાણિનામ્ ॥ ૭॥

અથ પાપાનિ કર્માણિ કુર્વન્ બાલો ન બુધ્યતે ।
સ્વૈઃ કર્મભિઃ દુર્મેધા અગ્નિદગ્ધ ઇવ તપ્યતે ॥ ૮॥

યો દણ્ડેનાઽદણ્ડેષુ અપ્રદુષ્ટેષુ દુષ્યતિ ।
દશાનામન્યતમં સ્થાનં ક્ષિપ્રમેવ નિગચ્છતિ ॥ ૯॥

વેદનાં પરુષાં જ્યાનિં શરીરસ્ય ચ ભેદનમ્ ।
ગુરુકં વાઽપ્યાબાધં ચિત્તક્ષેપં વા પ્રાપ્નુયાત્ ॥ ૧૦॥

રાજતો વોપસર્ગં અભ્યાખ્યાનં વા દારુણમ્ ।
પરિક્ષયં વા જ્ઞાતીનાં ભોગાનાં વા પ્રભઞ્જનમ્ ॥ ૧૧॥

અથવાऽસ્યાગારાણિ અગ્નિર્દહતિ પાવકઃ ।
કાયસ્ય ભેદાત્ દુષ્પ્રજ્ઞો નિરયં સ ઉપપદ્યતે ॥ ૧૨॥

ન નગ્નચર્યા ન જટા ન પઙ્કાં નાऽનશનં સ્થણ્ડિલશાયિકા વા ।
રજોજલીયં ઉત્કુટિકાપ્રધાનં શોધયન્તિ મર્ત્યં અવિતીર્ણકાંક્ષમ્ ॥ ૧૩॥

અલઙ્કૃતશ્ચેદપિ શમં ચરેત્ શાન્તો દાન્તો નિયતો બ્રહ્મચારી ।
સર્વેષુ ભૂતેષુ નિધાય દણ્ડં સ બ્રાહ્મણઃ સ શ્રમણઃ સ ભિક્ષુઃ ॥ ૧૪॥

હ્રીનિષેધઃ પુરુષઃ કશ્ચિત્ લોકે વિદ્યતે ।
યો નિન્દાં ન પ્રબુધ્યતિ અશ્વો ભદ્રઃ કશામિવ ॥ ૧૫॥

અશ્વો યથા ભદ્રઃ કશાનિવિષ્ટ આતાપિનઃ સંવેગિનો ભવત ।
શ્રદ્ધયા શીલેન ચ વીર્યેણ ચ સમાધિના ધર્મવિનિશ્ચયેન ચ ।
સમ્પન્નવિદ્યાચરણાઃ પ્રતિસ્મૃતાઃ પ્રહાસ્યથ દુઃખમિદં અનલ્પકમ્ ॥ ૧૬॥

ઉદકં હિ નયન્તિ નેતૃકાઃ ઇષુકારા નમયન્તિ તેજનમ્ ।
દારું નમયન્તિ તક્ષકા આત્માનં દમયન્તિ સુવ્રતાઃ ॥ ૧૭॥

॥ ઇતિ દણ્ડવર્ગઃ સમાપ્તઃ ॥

---

૧૧. જરાવર્ગ એકાદશઃ

કો નુ હાસઃ ક આનન્દો નિત્યં પ્રજ્વલિતે સતિ ।
અન્ધકારેણાऽવનદ્ધાઃ પ્રદીપં ન ગવેષયથ ॥ ૧॥

પશ્ય ચિત્રીકૃતં બિમ્બં અરુષ્કાયં સમુચ્છ્રિતમ્ ।
આતુરં બહુસઙ્કલ્પં યસ્ય નાऽસ્તિ ધ્રુવં સ્થિતિઃ ॥ ૨॥

પરિજીર્ણમિદં રૂપં રોગનીડં પ્રભંગુરમ્ ।
ભિદ્યતે પૂતિસન્દેહો મરણાન્તં હિ જિવિતમ્ ॥ ૩॥

યાનિમાન્યપથ્યાન્યલાબૂનીવ શરદિ ।
કાપોતકાન્યસ્થીની તાનિ દૃષ્ટ્વા કા રતિઃ ॥ ૪

અસ્થ્નાં નગરં કૃતં માંસલોહિતલેપનમ્ ।
યત્ર જરા ચ મૃત્યુશ્ચ માનો મ્રક્ષશ્ચાવહિતઃ ॥ ૫॥

જીર્યન્તિ વૈ રાજરથા સુચિત્રા અથ શરીરમપિ જરામુપેતિ ।
સતાં ચ ધર્મો ન જરામુપેતિ સન્તો હ વૈ સદ્ભ્યઃ પ્રવેદયન્તિ ॥ ૬॥

અલ્પશ્રુતોઽયં પુરુષો બલીવર્દ ઇવ જીર્યતિ ।
માંસાનિ તસ્ય વર્દ્ધન્તે પ્રજ્ઞા તસ્ય ન વર્દ્ધતે ॥ ૭॥

અનેકજાતિસંસારં સમધાવિષં અનિવિશમાનઃ ।
ગૃહકારકં ગવેષયન્ દુઃખા જાતિઃ પુનઃ પુનઃ ॥ ૮॥

ગૃહકારક દૃષ્ટોઽસિ પુનર્ગેહં ન કરિષ્યસિ ।
સર્વાસ્તે પાર્શ્વિકા ભગ્ના ગૃહકૂટં વિસંસ્કૃતમ્ ।
વિસંસ્કારગતં ચિત્તં તૃષ્ણાનાં ક્ષયમધ્યગાત્ ॥ ૯॥

અચરિત્ત્વા બ્રહ્મચર્યં અલબ્ધ્વા યૌવને ધનમ્ ।
જીર્ણક્રૌઞ્ચ ઇવ ક્ષીયન્તે ક્ષીણમત્સ્ય ઇવ પલ્વલે ॥ ૧૦॥

અચરિત્વા બ્રહ્મચર્યં અલબ્ધ્વા યૌવને ધનમ્ ।
શેરતે ચાપોઽતિક્ષીણા ઇવ પુરાણાન્યનુતન્વન્તઃ ॥ ૧૧॥

॥ ઇતિ જરાવર્ગઃ સમાપ્તઃ ॥

---

૧૨. આત્મવર્ગઃ દ્વાદશઃ

આત્માન ચેત્ પ્રિયં જાનીયાદ્ રક્ષેત્તં સુરક્ષિતમ્ ।
ત્રયાણામન્યતમં યામં પ્રતિજાગૃયાત્ પણ્ડિતઃ ॥ ૧॥

આત્માનમેવ પ્રથમં પ્રતિરૂપે નિવેશયેત્ ।
અથાન્યમનુશિષ્યાત્ ન ક્લિશ્યેત્ પણ્ડિતઃ ॥ ૨॥

આત્માનં ચેત્ તથા કુર્યાત્ યથાઽન્યમનુશાસતિ ।
સુદાન્તો વત દમયેદ્ આત્મા હિ કિલ દુર્દમઃ ॥ ૩॥

આત્મા હિ આત્મનો નાથઃ કોહિ નાથઃ પરઃ સ્યાત્ ।
આત્મના હિ સુદાન્તેન નાથં લભતે દુર્લભમ્ ॥ ૪॥

આત્મનૈવ કૃતં પાપં આત્મજં આત્મસંભવમ્ ।
અભિમથ્નાતિ દુર્મેધસં વજ્રમિવાશ્મમયં મણિમ્ ॥ ૫॥

યસ્યાઽત્યન્તદૌઃશીલ્યં માલુવા શાલમિવાતતમ્ ।
કરોતિ સ તથાત્માનં યથૈનમિચ્છન્તિ દ્વિષઃ ॥ ૬॥

સુકરાણ્યસાધૂન્યાત્મનોઽહિતાનિ ચ ।

યદ્વૈ હિતં ચ સાધુ ચ તદ્વૈ પરમદુષ્કરમ્ ॥ ૭॥

યઃ શાસનમર્હતાં આર્યાણાં ધર્મજીવિનામ્ ।
પ્રતિક્રુશ્યતિ દુર્મેધા દૃષ્ટિં નિઃશ્રિત્ય પાપિકામ્ ।
ફલાનિ કાષ્ઠકસ્યેવ આત્મહત્ત્યાયૈ ફુલ્લતિ ॥ ૮॥

આત્મનૈવ કૃતં પાપં આત્મના સંક્લિશ્યતિ ।
આત્મનાઽકૃતં પાપં આત્મનૈવ વિશુધ્યતિ ।
શુદ્ધ્યશુદ્ધી પ્રત્ત્યાત્મં નાઽન્યોઽન્યં વિશોધયેત્ ॥ ૯॥

આત્મનોઽર્થં પરાર્થેન બહુનાઽપિ ન હાપયેત્ ।
આત્મનોઽર્થમભિજ્ઞાય સદર્થપ્રસિતઃ સ્યાત્ ॥ ૧૦॥

॥ ઇતિ આત્મવર્ગઃ સમાપ્તઃ ॥

---

## ૧૩. લોકવર્ગઃ ત્રયોદશઃ

હીનં ધર્મં ન સેવેત પ્રમાદેન ન સંવસેત્ ।
મિથ્યાદૃષ્ટિં ન સેવેત ન સ્યાત્ લોકવર્દ્ધનઃ ॥ ૧॥

ઉત્તિષ્ઠેન્ન પ્રમાદ્યેદ્ ધર્મં સુચરિતં ચરેત્ ।
ધર્મચારી સુખં શેતેઽસ્મિં લોકે પરત્ર ચ ॥ ૨॥

ધર્મં ચરેત્ સુચરિતં ન તં દુશ્ચરિતં ચરેત્ ।
ધર્મચારી સુખં શેતેઽસ્મિં લોકે પરત્ર ચ ॥ ૩॥

યથા બુદ્બુદકં પશ્યેત્ યથા પશ્યેત્ મરીચિકામ્ ।
એવં લોકમવેક્ષમાણં મૃત્યુરાજો ન પશ્યતિ ॥ ૪॥

એન પશ્યતેમં લોકં ચિત્રં રાજરથોપમમ્ ।
યત્ર બાલા વિષીદન્તિ નાઽસ્તિ સઙ્ગો વિજાનતામ્ ॥ ૫॥

યશ્ચ પૂર્વં પ્રમાદ્ય પશ્ચાત્ સ ન પ્રમાદ્યતિ ।
સ ઇમં લોકં પ્રભાસયતિ અભ્રાન્મુક્ત ઇવ ચન્દ્રમા ॥ ૬॥

યસ્ય પાપં કૃતં કર્મ કુશલેન પિધીયતે ।
સ ઇમં લોકં પ્રભાસયતિ અભ્રાન્મુક્ત ઇવ ચન્દ્રમા ॥ ૭॥

અન્ધભૂતોઽયં લોકઃ તનુકોઽત્ર વિપશ્યતિ ।
શકુનો જાલમુક્ત ઇવાલ્પઃ સ્વર્ગાય ગચ્છતિ ॥ ૮॥

હંસા આદિત્યપથે યાન્તિ આકાશે યાન્તિ ઋદ્ધિયા ।
નીયન્તે ધીરા લોકાત્ જિત્વા મારં સવાહિનીકમ્ ॥ ૯॥

એકં ધર્મમતીતસ્ય મૃષાવાદિનો જન્તોઃ ।
વિતીર્ણપરલોકસ્ય નાઽસ્તિ પાપમકાર્યમ્ ॥ ૧૦॥

ન વૈ કદર્યા દેવલોકં વ્રજન્તિ બાલા હ વૈ ન પ્રશંસન્તિ દાનમ્ ।
ધીરશ્ચ દાનં અનુમોદમાનસ્તેનૈવ સ ભવતિ સુખી પરત્ર ॥ ૧૧॥

પૃથિવ્યા એકરાજ્યાત્ સ્વર્ગસ્ય ગમનાદ્ વા ।
સર્વલોકાઽઽધિપત્ત્યાદ્ સ્રોત આપત્તિફલં વરમ્ ॥ ૧૨॥

॥ ઇતિ લોકવર્ગઃ સમાપ્તઃ ॥

---

૧૪. બુદ્ધવર્ગઃ ચતુર્દશઃ

યસ્ય જિતં નાવજીયતે જિતમસ્ય ન યાતિ કશ્ચિલ્લોકે ।
તં બુદ્ધમનન્તગોચરં અપદં કેન પદેન નેષ્યથ ? ॥ ૧॥

યસ્ય જાલિની વિષાત્મિકા તૃષ્ણા નાઽસ્તિ કુત્રચિન્નેતુમ્ ।
તં બુદ્ધમનન્તગોચરં અપદં કેન પદેન નેષ્યથ ? ॥ ૨॥

યે ધ્યાનપ્રસૃતા ધીરાઃ નૈષ્કામ્યોપશમે રતાઃ ।
દેવા અપિ તેષાં સ્પૃહયન્તિ સંબુદ્ધાનાં સ્મૃતિમતામ્ ॥ ૩॥

કૃચ્છ્રો મનુષ્યપ્રતિલાભઃ કૃચ્છ્રં મર્ત્ત્યાનાં જીવિતમ્ ।
કૃચ્છ્રં સદ્ધર્મશ્રવણં કૃચ્છ્રો બુદ્ધાનામ્ ઉત્પાદઃ ॥ ૪॥

સર્વપાપસ્યાકરણં કુશલસ્યોપસમ્પદા ।
સ્વચિત્તપર્યવદાપનં એતદ્ બુદ્ધાનાં શાસનમ્ ॥ ૫॥

ક્ષાન્તિઃ પરમં તપઃ તિતિક્ષા નિર્વાણં પરમં વદન્તિ બુદ્ધાઃ ।
નહિ પ્રવ્રજિતઃ પરોપઘાતી શ્રમણો ભવતિ પરં વિહેઠયન્ ॥ ૬॥

અનુપવાદોઽનુપઘાતઃ પ્રાતિમોક્ષે ચ સંવરઃ ।
માત્રાજ્ઞતા ચ ભક્તે પ્રાન્તં ચ શયનાસનમ્ ।
અધિચિત્તે ચાયોગઃ એતદ્ બુદ્ધાનાં શાસનમ્ ॥ ૭॥

ન કાર્ષાપણવર્ષેણ તૃપ્તિઃ કામેષુ વિદ્યતે ।

અલ્પાસ્વાદા દુઃખાઃ કામા ઇતિ વિજ્ઞાય પણ્ડિતઃ ॥ ૮॥

અપિ દિવ્યેષુ કામેષુ રતિં સ નાઽધિગચ્છતિ ।
તૃષ્ણાક્ષયરતો ભવતિ સમ્યક્સંબુદ્ધશ્રાવકઃ ॥ ૯॥

બહુ વૈ શરણં યન્તિ પર્વાતાંશ્ચ વનાનિ ચ ।
આરામવૃક્ષચૈત્યાનિ મનુષ્યા ભયતર્જિતાઃ ॥ ૧૦॥

નૈતત્ ખલુ શરણં ક્ષેમં નૈતત્ શરણમુત્તમમ્ ।
નૈતત્ શરણમાગમ્ય સર્વદુઃખાત્પ્રમુચ્યતે ॥ ૧૧॥

યશ્ચ બુદ્ધં ચ ધર્મં ચ સંઘં ન્ચ શરણં ગતઃ ।
ચત્વારિ આર્યસત્યાનિ સમ્યક્ પ્રજ્ઞયા પશ્યતિ ॥ ૧૨॥

દુઃખં દુઃખસમુત્પાદં દુઃખસ્ય ચાતિક્રમમ્ ।
આર્યાષ્ટાઙ્ગિકં માર્ગં દુઃખોપશમગામિનમ્ ॥ ૧૩॥

એતત્ ખલુ શરણં ક્ષેમં એતત્ શરણમુત્તમમ્ ।
એતત્ શરણમાગમ્ય સર્વદુઃખાત્ પ્રમુચ્યતે ॥ ૧૪॥

દુર્લભઃ પુરુષાજાનેયો ન સ સર્વત્ર જાયતે ।
યત્ર સ જાયતે ધીરસ્તત્કુલં સુખમેધતે ॥ ૧૫॥

સુખો બુદ્ધાનાં ઉત્પાદઃ સુખા સદ્ધર્મ-દેશના ।
સુખા સંઘસ્ય સામગ્રી સમગ્રાણાં તપઃ સુખમ્ ॥ ૧૬॥

પૂજાર્હાન્ પૂજયતો બુદ્ધાન્ યદિ વા શ્રાવકાન્ ।
પ્રપઞ્ચસમિતિક્રાન્તાન્ તીર્ણશોકપરિદ્રવાન્ ॥ ૧૭॥

તાન્ તાદૃશાન્ પૂજયતો નિર્વૃતાન્ અકુતોભયાન્ ।
ન શક્યં પુણ્યં સંખ્યાતું એવમ્માત્રમપિ કેનચિત્ ॥ ૧૮॥

ઇતિ બુદ્ધવર્ગઃ સમાપ્તઃ

---

## ૧૫. સુખવર્ગઃ પઞ્ચદશઃ

સુસુખં વત જીવામો વૈરિષ્વવૈરિણઃ ।
વૈરિષુ મનુષ્યેષુ વિહરામોઽવૈરિણઃ ॥ ૧॥

સુસુખં વત જીવામ આતુરેષુ અનાતુરાઃ ।

આતુરેષુ મનુષ્યેષુ વિહરામોઽનાતુરાઃ ॥ ૨॥

સુસુખં વત જીવામ ઉત્સુકેષુ અનુત્સુકાઃ ।
ઉત્સુકેષુ મનુષ્યેષુ વિહરામ અનુત્સુકાઃ ॥ ૩॥

સુસુખં વત જીવામો યેષાં નો નાઽસ્તિ કિઞ્ચન ।
પ્રીતિભક્ષ્યા ભવિષ્યામઃ દેવા આભાસ્વરા યથા ॥ ૪॥

જયો વૈરં પ્રસૂતે દુઃખં શેતે પરાજિતઃ ।
ઉપશાન્તઃ સુખં શેને હિત્ત્વા જયપરાજયૌ ॥ ૫॥

નાઽસ્તિ રાગસમોઽગ્નિઃ નાઽસ્તિ દ્વેષસમઃ કલિઃ ।
નાસતિ સ્કન્ધસદૃશાનિ દુઃખાઃ નાઽસ્તિ શાન્તિપરં સુખમ્ ॥ ૬॥

જિઘત્સા પરમો રોગઃ સંસ્કારઃ પરમં દુઃખમ્ ।
એતદ્ જ્ઞાત્વા યથાભૂતં નિર્વાણં પરમં સુખમ્ ॥ ૭॥

આરોગ્યં પરમો લાભઃ સન્તુષ્ટિઃ પરમં ધનમ્ ।
વિશ્વાસઃ પરમા જ્ઞાતિઃ નિર્વાણં પરમં સુખમ્ ॥ ૮॥

પ્રવિવેકરસં પીત્વા રસં ઉપશમસ્ય ચ ।
નિર્દરો ભવતિ નિષ્પાપો ધર્મ પ્રીતિરસં પિબન્ ॥ ૯॥

સાધુ દર્શનમાર્યાણાં સન્નિવાસઃ સદા સુખઃ ।
અદર્શનેન બાલાનાં નિત્યમેવ સુખી સ્યાત્ ॥ ૧૦॥

બાલસંગતચારી હિ દીર્ઘમધાનં શોચતિ ।
દુઃખો બાલૈઃ સંવાસોઽમિત્રેણૈવ સર્વદા ।
ધીરશ્ચ સુખસંવાસો જ્ઞાતીનામિવ સમાગમઃ ॥ ૧૧॥

તસ્માદ્ધિ ધીરં ચ પ્રાજ્ઞં ચ બહુશ્રુતં ચ ધુર્યશીલં વ્રતવન્તમાર્યમ્
।
તં તાદૃશં સત્પુરુષં સુમેધસં ભજેત નક્ષત્રપથમિવ ચન્દમાઃ ॥

૧૨॥

॥ ઇતિ સુખવર્ગઃ સમાપ્તઃ ॥

૧૬. પ્રિયવર્ગઃ ષોડશઃ

અયોગે યુઞ્જન્નાત્માનં યોગે ચાયોજયન્ ।
અર્થં હિત્ત્વા પ્રિયગ્રાહી સ્પૃહયેદાત્માનુયોગિનમ્ ॥ ૧॥

મા પ્રિયૈઃ સમાગચ્છ અપ્રિયૈઃ કદાચન
પ્રિયાણામ્ અદર્શનં દુઃખં અપ્રિયાણાં ચ દર્શનમ્ ॥ ૨॥

તસ્માત્ પ્રિયં ન કુર્યાત્ પ્રિયાપાયો હિ પાપકઃ ।
ગ્રન્થાઃ તેષાં ન વિદ્યન્તે યેષાં નાઽસ્તિ પ્રિયાપ્રિયમ્ ॥ ૩॥

પ્રિયતો જાયતે શોકઃ પ્રિયતો જાયતે ભયમ્ ।
પ્રિયતો વિપ્રમુક્તસ્ય નાઽસ્તિ શોકઃ કુતો ભયમ્ ॥ ૪॥

પ્રેમતો જાયતે શોકઃ પ્રેમતો જાયતે ભયમ્ ।
પ્રેમતો વિપ્રમુક્તસ્ય નાઽસ્તિ શોકઃ કુતો ભયમ્ ॥ ૫॥

રત્યા જાયતે શોકો રત્યા જાયતે ભયમ્ ।
રત્યા વિપ્રમુક્તસ્ય નાઽસ્તિ શોકઃ કુતો ભયમ્ ॥ ૬॥

કામતો જાયતે શોકઃ કામતો જાયતે ભયમ્ ।
કામતો વિપ્રમુક્તસ્ય નાઽસ્તિ શોકઃ કુતો ભયમ્ ॥ ૭॥

તૃષ્ણાયા જાયતે શોકઃ તૃષ્ણાયા જાયતે ભયમ્ ।
તૃષ્ણાયા વિપ્રમુક્તસ્ય નાઽસ્તિ શોકઃ કુતો ભયમ્ ॥ ૮॥

શીલદર્શનસમ્પન્નં ધર્મિષ્ઠં સત્યવાદિનમ્ ।
આત્મનઃ કર્મ કુર્વાણં તં જનઃ કુરુતે પ્રિયમ્ ॥ ૯॥

છન્દજાતોઽનાખ્યાતે મનસા ચ સ્ફુરિતઃ સ્યાત્ ।
કામેષુ ચાઽપ્રતિબદ્ધચિત્ત ઊર્ધ્વસ્રોતા ઇત્યુચ્યતે ॥ ૧૦॥

ચિરપ્રવાસિનં પુરુષં દૂરતઃ સ્વસ્ત્યાગતમ્ ।
જ્ઞાતિમિત્રાણિ સુહૃદશ્ચાઽભિનન્દન્ત્યાગતમ્ ॥ ૧૧॥

તથૈવ કૃતપુણ્યમપિ અસ્માલ્લોકાત્પરં ગતમ્ ।
પુણ્યાનિ પ્રતિગૃહ્યન્તિ પ્રિયં જ્ઞાતિભિવાગતમ્ ॥ ૧૨॥

॥ ઇતિ પ્રિયવર્ગઃ સમાપ્તઃ ॥

૧૭. ક્રોધવર્ગઃ સપ્તદશઃ

ક્રોધં જહ્યાદ્ વિપ્રજહ્યાત્ માનં સંયોજનં સર્વમતિક્રમેત ।
તં નામ-રૂપયોરસજ્યમાનં અકિઞ્ચનં નાઽનુપતન્તિ દુઃખાનિ ॥ ૧॥

યો વૈ ઉત્પતિતં ક્રોધં રથં ભ્રાન્તમિવ ધારયેત્ ।
તમહં સારથિં બ્રવીમિ રશ્મિગ્રાહ ઇતરો જનઃ ॥ ૨॥

અક્રોધેન જયેત્ ક્રોધં અસાધું સાધુના જયેત્।
જયેત્ કદર્થં દાનેન જયેત્ સત્યેનાઽલીકવાદિનમ્ ॥ ૩॥

સત્યં ભણેન્ન ક્રુધ્યેત્ દદ્યાદલ્પેઽપિ યાચિતઃ ।
એતૈસ્ત્રિભિઃ સ્થાનૈઃ ગચ્છેદ્ દેવાનામન્તિકે ॥ ૪॥

અહિંસકા યે મુનયો નિત્યં કાયેન સંવૃતાઃ ।
તે યન્તિ અચ્યુતં સ્થાનં યત્ર ગત્વા ન શોચન્તિ ॥ ૫॥

સદા જાગ્રતાં અહોરાત્રં અનુશિક્ષમાણાનામ્ ।
નિર્વાણં અધિમુક્તાનાં અસ્તં ગચ્છન્તિ આસ્રવાઃ ॥ ૬॥

પુરણમેતદ્ અતુલ ! નૈતદ્ અદ્યતનમેવ ।
નિન્દન્તિ તુષ્ણીમાસીનં નિન્દન્તિ બહુભાણિનમ્ ।
મિતભાણિનમપિ નિન્દન્તિ નાઽસ્તિ લોકેઽનિન્દિતઃ ॥૭॥

ન ચાઽભૂત્ ન ભવિષ્યતિ ન ચૈતર્હિ વિદ્યતે ।
એકાન્તં નિન્દિતઃ પુરુષઃ એકાન્તં વા પ્રશંસિતઃ ॥ ૮॥

યશ્ચેદ્ વિજ્ઞાઃ પ્રશંસન્તિ અનુવિચ્ય શ્વઃ શ્વઃ ।
અચ્છિદ્રવૃત્તિં મેધાવિનં પ્રજ્ઞાશીલસમાહિતમ્ ॥ ૯॥

નિષ્કં જંબૂનદસ્યેવ કસ્તં નિન્દિતુમર્હતિ ।
દેવા અપિ તં પ્રશંસન્તિ બ્રહ્મણાઽપિ પ્રશંસિતઃ ॥ ૧૦॥

કાયપ્રકોપં રક્ષેત્ કાયેન સંવૃતઃ સ્યાત્ ।
કાયદુશ્ચરિતં હિત્ત્વા કાયેન સુચરિતં ચરેત્ ॥ ૧૧॥

વચઃ પ્રકોપં રક્ષેદ્ વાચા સંવૃતઃ સ્યાત્ ।
વચો દુશ્ચરિતં હિત્ત્વા વાચા સુચરિતં ચરેત્ ॥ ૧૨॥

મનઃ પ્રકોપં રક્ષેદ્ મનસા સંવૃતઃ સ્યાત્ ।
મનોદુશ્ચરિતં હિત્ત્વા મનસા સુચરિતં ચરેત્ ॥ ૧૩॥

કાયેન સંવૃતા ધીરા અથ વાચા સંવૃતાઃ ।

મનસા સંવૃતા ધીરા તે વૈ સુપરિસંવૃતાઃ ॥ ૧૪॥

॥ ઇતિ ક્રોધવર્ગઃ સમાપ્તઃ ॥

## ૧૮. મલવર્ગોષ્ટાદશઃ

પાણ્ડુપલાસમિવેદાનીમસિ યમપુરુષોઽપિ ચત્વાં ઉપસ્થિતાઃ ।
ઉદ્યોગમુખે ચ તિષ્ઠસિ પાથેયમપિ ચ તે ન વિદ્યતે ॥ ૧॥

સ કુરુ દ્વીપમાત્મનઃ ક્ષિપ્રં વ્યાયચ્છસ્વ પણ્ડિતો ભવ ।
નિર્ધૂતમલોઽનઙ્ગણો દિવ્યાં આર્યભૂમિં એષ્યસિ॥ ૨॥

ઉપનીતવયા ઇદનીમસિ સમ્પ્રયાતોઽસિ યમસ્યાન્તિકે ।
વાસોઽપિ ચ તે નાઽસ્તિ અન્તરા પાથેયમપિ ચ તે ન વિદ્યતે ॥ ૩॥

સ કુરુ દ્વીપમાત્મનઃ ક્ષિપ્રં વ્યાયચ્છસ્વ પણ્ડિતો ભવ ।
નિર્ધૂતમલોઽનઙ્ગણો ન પુનર્જાતિજરે ઉપેષ્યસિ ॥ ૪॥

અનુપૂર્વેણ મેધાવી સ્તોકં સ્તોકં ક્ષણે ક્ષણે ।
કર્મારો રજતસ્યેવ નિર્ધમેત્ મલમાત્મનઃ ॥ ૫॥

અયસ ઇવ મલં સમુત્થિતં તસ્માદ્ ઉત્થાય તદેવ ખાદતિ ।
એવં અતિધાવનચારિણં સ્વાનિ કર્માણિ નયન્તિ દુર્ગતિમ્ ॥ ૬॥

અસ્વાધ્યાયમલા મન્ત્રા અનુત્થાનમલા ગૃહા ।
મલં વર્ણસ્ય કૌસીદ્યં પ્રમાદો રક્ષતો મલમ્ ॥ ૭॥

મલં સ્ત્રિયા દુશ્ચરિતં માત્સર્યં દદતો મલમ્ ।
મલં વૈ પાપકા ધર્મા અસ્મિન્ લોકે પરત્ર ચ ॥ ૮॥

તતો મલં મલતરં અવિદ્યા પરમં મલમ્ ।
એતત્ મલં પ્રહાય નિર્મલા ભવત ભિક્ષવઃ ॥ ૯॥

સુજીવિતં અહ્રીકેણ કાકશૂરેણ ધ્વંસિના ।
પ્રસ્કન્દિના પ્રગલ્ભેન સંક્લિષ્ટેન જીવિતમ્ ॥ ૧૦॥

હ્રીમતા ચ દુર્જીવિતં નિત્યં શૂચિગવેષિણા ।
અલીનેનાઽપ્રગલ્ભેન શુદ્ધાજીવેન પશ્યતા ॥ ૧૧॥

યઃ પ્રાણમતિપાતયતિ મૃષાવાદં ચ ભાષતે ।

લોકેઽદત્તમાદત્તે પરદારાંશ્ચ ગચ્છતિ ॥ ૧૨॥

સુરામૈરેયપાનં ચ યો નરોઽનુયુનક્તિ ।
ઇહૈવમેષ લોકે મૂલં ખનત્યાત્મનઃ ॥૧૩॥

એવં ભો પુરુષ ! જાનીહિ પાપધર્માણોઽસંયતાન્ ।
મા ત્વાં લોભોઽધર્મશ્ચ ચિરં દુઃખાય રન્ધેરન્ ॥ ૧૪॥

દદાતિ વૈ યથાશ્રદ્ધં યથા પ્રસાદનં જનઃ ।
તત્ર યો મૂકો ભવતિ પરેષાં પાનભોજને ।
ન સ દિવા વા રાત્રૌ વા સમાધિં અધિગચ્છતિ ॥ ૧૫॥

યસ્ય ચ તત્ સમુચ્છિન્નં મૂલઘાતં સમુદ્ધતમ્ ।
સ વૈ દિવા વા રાત્રૌ વા સમાધિં અધિગચ્છતિ ॥ ૧૬॥

નાઽસ્તિ રાગસમોઽગ્નિઃ નાઽસ્તિ દ્વેષસમો ગ્રાહઃ ।
નાઽસ્તિ મોહસમં જાલં નાઽસ્તિ તૃષ્ણા સમા નદી ॥ ૧૭॥

સુદર્શં વદ્યમન્યેષાં આત્મનઃ પુનર્દુર્દશમ્ ।
પરેષાં હિ સ વદ્યાનિ અવપુણાતિ યથાતુષમ્ ।
આત્મનઃ પુનઃ છાદયતિ કલિમિવ કિતવાત્ શઠઃ ॥ ૧૮॥

પરવદ્યાઽનુદર્શિનો નિત્યં ઉદ્ધ્યાનસંજ્ઞિનઃ ।
આસ્રવાસ્તસ્ય વર્દ્ધન્તે આરાદ્ સ આસ્રવક્ષયાત્ ॥ ૧૯॥

આકાશે ચ પદં નાઽસ્તિ શ્રમણો નાઽસ્તિ બહિઃ ।
પ્રપઞ્ચાઽભિરતાઃ પ્રજા નિષ્પ્રપઞ્ચાસ્તથાગતાઃ ॥ ૨૦॥

આકાશે ચ પદં નાઽસ્તિ શ્રમણો નાઽસ્તિ બહિઃ ।
સંસ્કારાઃ શાશ્વતા ન સન્તિ નાઽસ્તિ બુદ્ધાનામિઙ્ગિતમ્ ॥ ૨૧॥

॥ ઇતિ મલવર્ગઃ સમાપ્તઃ ॥

---

૧૯. ધર્મષ્ઠવર્ગઃ એકોનવિંશઃ

ન તેન ભવતિ ધર્મસ્થો યેનાર્થં સહસા નયેત્ ।
યશ્ચાઽર્થં અનર્થં ચ ઉભૌ નિશ્ચિનુયાત્ પણ્ડિતઃ ॥ ૧॥

અસાહસેન ધર્મેણ સમેન નયતે પરાન્ ।
ધર્મેણ ગુપ્તો મેધાવી ધર્મસ્થ ઇત્યુચ્યતે ॥ ૨॥

ન તાવતા પણ્ડિતો ભવતિ યાવતા બહુ ભાષતે ।
ક્ષેમી અવૈરી અભયઃ પણ્ડિત ઇત્યુચ્યતે ॥ ૩॥

ન તાવતા ધર્મધરો યાવતા બહુ ભાષતે ।
યશ્ચાલ્પમઽપિ શ્રુત્વા ધર્મં કાયેન પશ્યતિ ।
સ વૈ ધર્મધરો ભવતિ યો ધર્મં ન પ્રમાદ્યતિ ॥ ૪॥

ન તેન સ્થવિરો ભવતિ યેનાઽસ્ય પલિતં શિરઃ ।
પરિપક્વં વયસ્તસ્ય મોઘજીર્ણ ઇત્યુચ્યતે ॥ ૫॥

યસ્મિન્ સત્યં ચ ધર્મશ્ચાહિંસા સંયમો દમઃ ।
સ વૈ વાન્તમલો ધીરઃ સ્થવિર ઇતુચ્યતે ॥ ૬॥

ન વાક્ કરણમાત્રેણ વર્ણપુષ્કલતયા વા ।
સાધુરૂપો નરો ભવતિ ઈર્ષુકો મત્સરી શઠઃ ॥ ૭॥

યસ્ય ચૈતત્ સમુચ્છિન્નં મૂલઘાતં સમુદ્ધતમ્ ।
સ વાન્તદોષો મેધાવી સાધુરૂપ ઇત્યુચ્યતે ॥ ૮॥

ન મુણ્ડકેન શ્રમણોઽવ્રતોઽલીકં ભણન્ ।
ઇચ્છાલાભસમાપન્નઃ શ્રમણઃ કિં ભવિષ્યતિ ॥ ૯॥

યશ્ચ શમયતિ પાપાનિ અણૂનિ સ્થૂલાનિ સર્વશઃ ।
શમિતત્વાદ્ધિ પાપાનાં શ્રમણ ઇતુચ્યતે ॥ ૧૦॥

ન તાવતા ભિક્ષુર્ભવતિ યાવતા ભિક્ષતે પરાન્ ।
વિશ્વં ધર્મં સમાદાય ભિક્ષુર્ભવતિ ન તાવતા ॥ ૧૧॥

ય ઇહ પુણ્યં ચ પાપં ચ વાહયિત્વા બ્રહ્મચર્યવાન્ ।
સંખ્યાય લોકે ચરતિ સ વૈ ભિક્ષુરિત્યુચ્યતે ॥ ૧૨॥

ન મૌનેન મુનિર્ભવતિ મૂઢરૂપોઽવિદ્વાન્ ।
યશ્ચ તુલામિવ પ્રગૃહ્ય વરમાદાય પણ્ડિતઃ ॥ ૧૩॥

પાપાનિ પરિવર્જયતિ સ મુનિસ્તેન સ મુનિઃ ।
યો મનુત ઉભૌ લોકૌ મુનિસ્તેન પ્રોચ્યતે ॥ ૧૪॥

ન તેનાઽઽર્યો ભવતિ યેન પ્રાણાન્ હિનસ્તિ ।
અહિંસયા સર્વપ્રાણાનાં આર્ય ઇતિ પ્રોચ્યતે ॥ ૧૫॥

ન શીલવ્રતમાત્રેણ બાહુશ્રુત્યેન વા પુનઃ ।
અથવા સમાધિલાભેન વિવિચ્ય શયનેન વા ॥ ૧૬॥

સ્પૃશામિ નૈષ્કર્મ્યસુખં અપૃથગ્જનસેવિતમ્ ।
ભિક્ષો વિશ્વાસં મા પાદીઃ અપ્રાપ્ત આસ્રવક્ષયમ્ ॥ ૨૧॥

॥ ઇતિ ધર્મસ્થવર્ગઃ સમાપ્તઃ ॥

---

૨૦. માર્ગવર્ગઃ વિંશઃ

માર્ગાણામષ્ટાઙ્ગિકઃ શ્રેષ્ઠઃ સત્યાનાં ચત્વારિ પદાનિ ।
વિરાગઃ શ્રેષ્ઠો ધર્માણાં દ્વિપદાનાં ચ ચક્ષુષ્માન્ ॥ ૧॥

એષ વો માર્ગો નાऽસ્ત્યન્યો દર્શનસ્ય વિશુદ્ધયે ।
એતં હિ યૂયં પ્રતિપદ્યધ્વં મારસ્યૈષ પ્રમોહનઃ ॥ ૨॥

એતં હિ યૂયં પ્રતિપન્ના દુઃખસ્યાન્તં કરિષ્યથ ।
આખ્યાતો વૈ મયા માર્ગઃ આજ્ઞાય શલ્ય-સંસ્થાનમ્ ॥ ૩॥

યુષ્માભિઃ કાર્યં આતપ્યં આખ્યાતારસ્તથાગતાઃ ।
પ્રતિપન્નાઃ પ્રમોક્ષ્યન્તે ધ્યાયિનો મારબન્ધનાત્ ॥ ૪॥

સર્વે સંસ્કારા અનિત્યા ઇતિ યદા પ્રજ્ઞયા પશ્યતિ ।
અથ નિર્વિન્દતિ દુઃખાનિ એષ માર્ગો વિશુદ્ધયે ॥ ૫॥

સર્વે સંસ્કારા દુઃખા ઇતિ યદા પ્રજ્ઞયા પશ્યતિ ।
અથ નિર્વિન્દતિ દુઃખાનિ એષ માર્ગો વિશુદ્ધયે ॥ ૬॥

સર્વે ધર્મા અનાત્માન ઇતિ યદા પ્રજ્ઞયા પશ્યતિ ।
અથ નિર્વિન્દતિ દુઃખાનિ એષ માર્ગો વિશુદ્ધયે ॥ ૭॥

ઉત્થાનકાલેऽનુત્તિષ્ઠન્ યુવા બલિ આલસ્યમુપેતઃ ।
સંસન્ન-સઙ્કલ્પ-મનાઃ કુસીદઃ પ્રજ્ઞયા માર્ગં અલસો ન વિન્દતિ ॥ ૮॥

વાચાऽનુરક્ષી મનસા સુસંકૃતઃ કાયેન ચાऽકુશલં ન કુર્યાત્ ।
એતાન્ ત્રીન્ કર્મપથાન્ વિશોધયેત્ આરાધયેત્ માર્ગં ઋષિપ્રવેદિતમ્ ॥ ૯॥

યોગાદ્ વૈ જાયતે ભૂરિ અયોગાદ્ ભૂરિસંક્ષયઃ ।
એતં દ્વેધાપથં જ્ઞાત્ત્વા ભવાય વિભવાય ચ ।
તથાऽऽત્માનં નિવેશયેદ્ યથાભૂરિ પ્રવર્ધતે ॥ ૧૦॥

વનં છિન્ધિ મા વૃક્ષં વનતો જાયતે ભયમ્ ।
છિત્ત્વા વનં ચ વનથં ચ નિર્વના ભવથ ભિક્ષવઃ ॥ ૧૧॥

યાવદ્ધિ વનથો ન છિદ્યતેઽણુમાત્રોઽપિ નરસ્ય નારીષુ ।
પ્રતિબદ્ધમનાઃ નુ તાવત્ સ વત્સઃ ક્ષીરપ ઇવ માતરિ ॥ ૧૨॥

ઉચ્છિન્ધિ સ્નેહમાત્મનઃ કુમુદં શારદીકમિવ પાણિના ।
શાન્તિમાર્ગમેવ બૃંહય નિર્વાણં સુગતેન દેશિતમ્ ॥ ૧૩॥

ઇહ વર્ષાસુ વસિષ્યામિ ઇહ હેમન્તગ્રીષ્મયોઃ ।
ઇતિ બાલો વિચિન્તયતિ અન્તરાયં ન બુધ્યતે ॥ ૧૪॥

તં પુત્ર-પશુ-સમ્મતં વ્યાસક્તમનસં નરમ્ ।
સુપ્તં ગ્રામં મહૌઘ ઇવ મૃત્યુરાદાય ગચ્છતિ ॥ ૧૫॥

ન સન્તિ પુત્રાસ્ત્રાણાય ન પિતા નાઽપિ બાન્ધવાઃ ।
અન્તકેનાધિપન્નસ્ય નાઽસ્તિ જ્ઞાતિષુ ત્રાણતા ॥ ૧૬॥

એતમર્થવશં જ્ઞાત્વા પણ્ડિતો શીલસંવૃતઃ ।
નિર્વાણગમનં માર્ગં ક્ષિપ્રમેવ વિશોધયેત્ ॥ ૧૭॥

॥ ઇતિ માર્ગવર્ગઃ સમાપ્તઃ ॥

---

૨૧. પ્રકીર્ણકવર્ગઃ એકવિંશઃ

માત્રાસુખપરિત્યાગાત્ પશ્યેચ્ચેત્ વિપુલં સુખમ્ ।
ત્યજેન્માત્રાસુખં ધીરઃ સમ્પશ્યન્ વિપુલં સુખમ્ ॥ ૧॥

પરદુઃખોપાદાનેન ય આત્મનઃ સુખમિચ્છતિ ।
વૈરસંસર્ગસંસૃષ્ટો વૈરાત્ સ ન પ્રમુચ્યતે ॥ ૨॥

યદ્ધિ કૃત્યં અપવિદ્ધં અકૃત્યં પુનઃ કુર્યુઃ।
ઉન્મલાનાં પ્રમત્તાનાં તેષાં વર્દ્ધન્ત આસ્રવાઃ ॥ ૩॥

યેષાંચ્ચ સુસમારબ્ધા નિત્યં કાયગતા સ્મૃતિઃ ।
અકૃત્યં તે ન સેવન્તે કૃત્યે સાતત્યકારિણઃ ।
સતાં સમ્પ્રજાનાનાં અસ્તં ગચ્છન્ત્યાસ્રવાઃ ॥ ૪॥

માતરં પિતરં હત્ત્વા રાજાનૌ દ્વૌ ચ ક્ષત્રિયૌ ।

રાષ્ટ્રં સાઽનુચરં હત્ત્વાઽનઘો યાતિ બ્રાહ્મણઃ ॥ ૫॥

માતરં પિતરં હત્વા રાજાનૌ દ્વૌ ચ શ્રોત્રિયૌ ।
વ્યાઘ્રપંચમં હત્ત્વાઽનઘો યાતિ બ્રાહ્મણઃ ॥ ૬॥

સુપ્રબુદ્ધં પ્રબુધ્યન્તે સદા ગૌતમશ્રાવકાઃ ।
યેષાં દિવા ચ રાત્રૌ ચ નિત્યં બુદ્ધગતા સ્મૃતિઃ ॥ ૭॥

સુપ્રબુદ્ધા પ્રબુધ્યન્તે સદા ગૌતમશ્રાવકાઃ ।
યેષાં દિવા ચ રાત્રૌ ચ નિત્યં ધર્મગતા સ્મૃતિઃ ॥ ૮॥

સુપ્રબુદ્ધાઃ પ્રબુધ્યન્તે સદા ગૌતમશ્રાવકાઃ ।
યેષાં દિવા ચ રાત્રૌ ચ નિત્યં સંઘગતા સ્મૃતિઃ ॥ ૯॥

સુપ્રબુદ્ધા પ્રબુધ્યન્તે સદા ગૌતમશ્રાવકાઃ ।
યેષાં દિવા ચ રાત્રૌ ચ નિત્યં કાયગતા સ્મૃતિઃ ॥૧૦॥

સુપ્રબુદ્ધાઃ પ્રબુધ્યન્તે સદા ગૌતમશ્રાવકાઃ ।
યેષાં દિવા ચ રાત્રૌ ચ અહિંસાયાં રતં મનઃ ॥ ૧૧॥

સુપ્રબુદ્ધાઃ પ્રબુધ્યન્તે સદા ગૌતમશ્રાવકાઃ ।
યેષાં દિવા ચ રાત્રૌ ચ ભાવનાયાં રતં મનઃ ॥ ૧૨॥

દુષ્પ્રવ્રજ્યાં દુરભિરામં દુરાવાસં ગૃહં દુઃખમ્ ।
દુખોઽસમાનસંવાસો દુઃખાઽનુપતિતોઽધ્વગઃ ।
તસ્માન્ન ચાઽધ્વગઃ સ્યાન્ન ચ દુઃખાનુપતિતઃ સ્યાત્ ॥ ૧૩॥

શ્રદ્ધઃ શીલેન સમ્પન્નો યશોભોગસમર્પિતઃ ।
યં યં પ્રદેશં ભજતે તત્ર તત્રૈવ પૂજિતઃ ॥ ૧૪॥

દૂરે સન્તઃ પ્રકાશન્તે હિમવન્ત ઇવ પર્વતાઃ ।
અસન્તોઽત્ર ન દૃશ્યન્તે રાત્રિક્ષિપ્તા યથા શરાઃ ॥ ૧૫॥

એકાસન એકશય્ય એકશ્ચરન્નતન્દ્રિતઃ ।
એકો દમયન્નાત્માનં વનાન્તે રતઃ સ્યાત્ ॥ ૧૬॥

॥ ઇતિ પ્રકીર્ણકવર્ગઃ સમાપ્તઃ ॥

૨૨. નિરયવર્ગો દ્વાવિંશઃ

અભૂતવાદી નિરયમુપેતિ યો વાઽપિ કૃત્વા ન કરોમિ તિ ચાહ ।
ઉભાવપિ તૌ પ્રેત્ય સમા ભવતો નિહીનકર્માણૌઃ મનુજૈઃ પરત્ર ॥ ૧॥

કાષાયકણ્ઠા બહવઃ પાપધર્મા અસંયતાઃ ।
પાપાઃ પાપૈઃ કર્મભિર્નિરયં તે ઉત્પદ્યન્તે ॥ ૨॥

શ્રેયાન્ અયોગોલો ભુક્તસ્તપ્તોઽગ્નિશિખોપમ ।
યચ્ચેદ્ ભુઞ્જીત દુઃશીલો રાષ્ટ્રપિંડં અસંયતઃ ॥ ૩॥

ચત્વારિ સ્થાનાનિ નરઃ પ્રમત્તઃ આપદ્યતે પરદારોપસેવી ।
અપુણ્યલાભં ન નિકામશય્યાં નિન્દાં તૃતીયાં નિરયં ચતુર્થમ્ ॥ ૪॥

અપુણ્યલાભશ્ચ ગતિશ્ચ પાપિકા ભીતસ્ય ભીતયા રતિશ્ચ સ્તોકિકા ।
રાજા ચ દણ્ડં ગુરુકં પ્રણયતિ તસ્માત્ નરો પરદારાન્ ન સેવેત્ ॥ ૫॥

કુશો યથા દુર્ગૃહીતો હસ્તમેવાઽનુકૃન્તતિ ।
શ્રામણ્યં દુષ્પરામૃષ્ટં નિરયાયોપકર્ષતિ ॥ ૬॥

યત્ કિઞ્ચિત્ શિથિલં કર્મ સંક્લિષ્ટં ચ યદ્ વ્રતમ્ ।
સંકૃચ્છ્રં બ્રહ્મચર્યં ન તદ્ ભવતિ મહત્ફલમ્ ॥ ૭॥

કુર્યાચ્ચેત્ કુર્વીતૈતદ્ દૃઢમેતત્ પરાક્રમેત ।
શિથિલો હિ પરિવ્રાજકો ભૂય આકિરતે રજઃ ॥ ૮॥

અકૃતં દુષ્કૃતં શ્રેયઃ પશ્ચાત્ તપતિ દુષ્કૃતમ્ ।
કૃતં ચ સુકૃતં શ્રેયો યત્ કૃત્વા નાઽનુતપ્યતે ॥ ૯॥

નગરં યથા પ્રત્યન્તં ગુપ્તં સાન્તર્બાહ્યં
એવં ગોપયેદાત્માનં ક્ષણં વૈ મા ઉપાતિગાઃ ।
ક્ષણાઽતીતા હિ શોચન્તિ નિરયે સમર્પિતાઃ ॥ ૧૦॥

અલજ્જિતા યે લજ્જન્તે લજ્જિત યે ન લજ્જન્તે ।
મિથ્યાદૃષ્ટિ સમાદાના સત્ત્વા ગચ્છન્તિ દુર્ગતિમ્ ॥ ૧૧॥

અભયે ચ ભયદર્શિનો ભયે ચાઽભયદર્શિનઃ ।
મિથ્યાદૃષ્ટિસમાદાનાઃ સત્ત્વા ગચ્છન્તિ દુર્ગતિમ્ ॥ ૧૨॥

અવદ્યે વદ્યમતયો વદ્યે ચાઽવદ્યદર્શિનઃ ।
મિથ્યાદૃષ્ટિસમાદાનાઃ સત્ત્વા ગચ્છન્તિ દુર્ગતિમ્ ॥ ૧૩॥

વદ્યં ચ વદ્યતો જ્ઞાત્વાઽવદ્યં ચાવદ્યતઃ ।

સમ્યગ્દૃષ્ટિસમાદાનાઃ સત્ત્વા ગચ્છન્તિ સુગતિમ્ ॥ ૧૪॥

॥ ઇત્ નિરયવર્ગઃ સમાપ્તઃ ॥

---

૨૩. નાગવર્ગઃ ત્રયોવિંશઃ

અહં નાગ ઇવ સંગ્રામે ચાપતઃ પતિતં શરમ્ ।
અતિવાક્યં તિતિક્ષિષ્યે દુઃહ્શીલા હિ બહુજનાઃ ॥ ૧॥

દાન્તં નયન્તિ સમિતિં દાન્તં રાજાઽભિરોહતિ ।
દાન્તઃ શ્રેષ્ઠા મનુષ્યેષુ યોતિવાક્યં તિતિક્ષસે ॥ ૨॥

વરમશ્વતરા દાન્તા આજાનીયાશ્વ સિન્ધવઃ ।
કુઞ્જરાશ્વ મહાનાગા આત્મદાન્તસ્તતો વરમ્ ॥ ૩॥

ન હિ એતૈર્યાનૈઃ ગચ્છેદગતાં દિશમ્ ।
યથાઽઽત્મના સુદાન્તેન દાન્તો દાન્તેન ગચ્છતિ ॥ ૪॥

ધનપાલકો નામ કુઞ્જરઃ કટકપ્રભેદનો દુર્નિવાર્યઃ ।
બધ્ધઃ કવલં ન ભુંક્તે સ્મરતિ નાગવનસ્ય કુઞ્જરઃ ॥ ૫॥

મૃધ્ધો યદા ભવતિ મહાઘસશ્વ નિદ્રાયિતઃ સપરિવર્ત્તશાયી ।
મહાવરાહ ઇવ નિવાપપુષ્ટઃ પુનઃ પુનઃ ગર્ભમુપૈતિ મન્દઃ ॥ ૬॥

ઇદં પુરા ચિત્તમચરત્ ચારિકાં યથેચ્છં યથાકામં યથાસુખમ્ ।
તદદ્યાઽહં નિગ્રહિષ્યામિ યોનિશો હસ્તિનં પ્રભિન્નમિવાઙ્કુશગ્રાહઃ ॥ ૭॥

અપ્રમાદરતા ભવત સ્વચિત્તમનુરક્ષત ।
દુર્ગાદુધ્ધરતાઽઽત્માનં પઙ્કે સક્ત ઇવ કુઞ્જરઃ ॥ ૮॥

સ ચેત્ લભેત નિપક્વં સહાયં સાર્ધ્ધં ચરન્તં સાધુવિહારિણં ધીરમ્ ।
અભિભૂય સર્વાન્ પરિશ્રયાન્ ચરેત્ તેનાઽઽત્તમનાઃ સ્મૃતિમાન્ ॥ ૯॥

ન ચેત્ લભેત નિપક્વં સહાયં સાર્ધ્ધં ચરન્તં સાધુવિહારિણં ધીરમ્ ।
રાજેવ રાષ્ટ્રં વિજિતં પ્રહાય એકશ્ચરેત્ માતઙ્ગોઽરણ્ય ઇવ નાગઃ ॥ ૧૦॥

એકસ્ય ચરિતં શ્રેયો નાઽસ્તિ બાલે સહાયતા ।
એકશ્ચરેન્ન ચ પાપાનિ કુર્યાદ્ અલ્પોત્સુકો માતંગોઽરણ્ય ઇવ નાગઃ ॥ ૧૧॥

અર્થે જાતે સુખાઃ સહાયાઃ તુષ્ટિઃ સુખા યા યેતરેતરેણ ।

પુણ્યં સુખં જીવિતસંક્ષયે સર્વસ્ય દુઃખસ્ય સુખં પ્રહાણમ્ ॥ ૧૨॥

સુખા માત્રીયતા લોકેઽથ પિત્રીયતા સુખા
સુખા શ્રમણતા લોકેઽથ બ્રાહ્મણતા સુખા ॥ ૧૩॥

સુખં યાવદ્ જરાં શીલં સુખા શ્રદ્ધા પ્રતિષ્ઠિતા ।
સુખઃ પ્રજ્ઞાયાઃ પ્રતિલાભઃ પાપાનાં અકરણં સુખમ્ ॥ ૧૪॥

॥ ઇતિ નાગવર્ગઃ સમાપ્તઃ ॥

---

૨૪. તૃષ્ણાવર્ગઃ ચતુર્વિંશઃ

મનુજસ્ય પ્રમત્તચારિણઃ તૃષ્ણા વર્દ્ધતે માલુવેવ ।
સ પ્લવતેઽહરહઃ ફલમિચ્છન્ ઇવ વને વાનરઃ ॥ ૧॥

યં એષા સાહયતિ જન્મિની તૃષ્ણા લોકે વિષાત્મિકા ।
શોકાસ્તસ્ય પ્રવર્દ્ધન્તેઽભિવર્દ્ધમાનં વીરણમ્ ॥ ૨॥

યશ્ચૈતાં સાહયતિ જન્મિનીં તૃષ્ણાં લોકે દુરત્યયામ્ ।
શોકાઃ તસ્માત્ પ્રપતન્ત્યુદબિન્દુરિવ પુષ્કરાત્ ॥ ૩॥

તદ્ વો વદામિ ભદ્રં વો યાવન્ત ઇહ સમાગતાઃ ।
તૃષ્ણાયા મૂલં ખનતોશીરાર્થીવ વીરણમ્ ॥ ૪॥

યથાઽપિ મૂલેઽનુપદ્રવે દૃઢે છિન્નોઽપિ વૃક્ષઃ પુનરેવ રોહતિ ।
એવમપિ તૃષ્ણાઽનુશયેઽનિહતે નિર્વર્ત્તતે દુઃખમિદં પુનઃ પુનઃ ॥ ૫॥

યસ્ય ષટ્ત્રિંશત્ સ્રોતાંસિ મનાપશ્રવણાનિ ભૂયાસુઃ ।
વાહા વહન્તિ દુર્દૃષ્ટિ સઙ્કલ્પા રાગનિઃસૃતાઃ ॥ ૬॥

સ્રવન્તિ સર્વતઃ સ્રોતાંસિ લતોદ્ભિદ્ય તિષ્ઠતિ ।
તાં ચ દૃષ્ટ્વા લતાં જાતાં મૂલં પ્રજ્ઞયા છિન્દત ॥ ૭॥

સરિતઃ સ્નિગ્ધાશ્ચ સૌમનસ્યા ભવન્તિ જન્તોઃ
તે સ્રોતઃસૃતાઃ સુખૈષિણસ્તે વૈ જાતિજરોપગા નરાઃ ॥ ૮॥

તૃષ્ણયા પુરસ્કૃતાઃ પ્રજાઃ પરિસર્પન્તિ શશ ઇવ બદ્ધઃ ।
સંયોજનસંગસક્તકા દુઃખમુપયન્તિ પુનઃ પુનઃ ચિરાય ॥ ૯॥

તૃષ્ણયા પુરસ્કૃતાઃ પ્રજાઃ પરિસર્પન્તિ શશ ઇવ બદ્ધઃ ।

તસ્માત્ તૃષ્ણાં વિનોદયેદ્ ભિક્ષુરાકાङ્ક્ષી વિરાગમાત્માનઃ ॥ ૧૦॥

યો નિર્વણાર્થી વનાઽધિમુક્તો વનમુક્તો વનમેવ ધાવતિ ।
તું પુદ્ગલમેવ પશ્યત મુક્તો બન્ધનમેવ ધાવતિ ॥ ૧૧॥

ન તદ્ દૃઢં બન્ધનમાહુર્ધીરા યદ્ આયસં દારુજં પર્વજં ચ ।
સારવદ્-રક્તા મણિકુણ્ડલેષુ પુત્રેષુ દારેષુ ચ યાઽપેક્ષા ॥ ૧૨॥

એતદ્ દૃઢં બન્ધનમાહુર્ધીરા અપહારિ શિથિલં દુષ્પ્રમોચમ્ ।
એતદપિ છિત્ત્વા પરિવ્રજન્તિ અનપેક્ષિણઃ કામસુખં પ્રહાય ॥ ૧૩॥

યે રાગરક્તા અનુપતન્તિ સ્રોતઃ સ્વયંકૃતં મર્કટક ઇવ જાલમ્ ।
એતદપિ છિત્ત્વા વ્રજન્તિ ધીરા અનપેક્ષિણઃ સર્વદુઃખં પ્રહાય ॥ ૧૪॥

મુઞ્ચ પુરો મુઞ્ચ પશ્ચાત્ મધ્યે મુઞ્ચ ભવસ્ય પારગઃ ।
સર્વત્ર વિમુક્તમાનસો ન પુનઃ જાતિજરે ઉપૈપિ ॥ ૧૫॥

વિતર્કપ્રમથિતસ્ય જન્તોઃ તીવ્રરાગસ્ય શુભાઽનુદર્શિનઃ ।
ભૂયઃ તૃષ્ણા પ્રવર્દ્ધતે એષ ખલુ દૃઢં કરોતિ બન્ધનમ્ ॥ ૧૬॥

વિતર્કોપશમે ચ યો રતોઽશુભં ભાવયતે સદા સ્મૃતઃ ।
એષ ખલુ વ્યન્તીકરિષ્યતિ એષ છેત્સ્યતિ મારબન્ધનમ્ ॥ ૧૭॥

નિષ્ઠાંગતોઽસંત્રાસી વીતતૃષ્ણોઽનંગણઃ ।
ઉત્સૃજ્ય ભવશલ્યાનિ અન્તિમોઽયં સમુચ્છ્રયઃ ॥ ૧૮॥

વીતતૃષ્ણોઽનાદાનો નિરુક્તિપદકોવિદો ।
અક્ષરાણાં સન્નિપાતં જાનાતિ પૂર્વાપરાણિ ચ ।
સ વૈ અન્તિમશારીરો મહાપ્રાજ્ઞ ઇત્યુચ્યતે॥ ૧૯॥

સર્વાભિભૂઃ સર્વવિદહમસ્મિ સર્વેષુ ધર્મેષુ અનુપલિપ્તઃ ।
સર્વંજહઃ તૃષ્ણાક્ષયે વિમુક્તઃ સ્વયમભિપ્રાય કમુદ્દિશેયમ્ ॥ ૨૦॥

સર્વદાનં ધર્મદાનં જયતિ સર્વરસં ધર્મરસો જયતિ ।
સર્વાં રતિં ધર્મરતિર્જયતિ તૃષ્ણાક્ષયઃ સર્વદુઃખં જયતિ ॥ ૨૧॥

ઘ્નન્તિ ભોગ દુર્મેધસં ન ચેત્ પારગવેષિણઃ ।
ભોગતૃષ્ણયા દુર્મેધા હન્ત્યન્ય ઇવાત્માનઃ ॥ ૨૨॥

તૃણદોષાણિ ક્ષેત્રાણિ રાગદોષેયં પ્રજા ।
તસ્માદ્ધિ વીતરાગેષુ દત્તં ભવતિ મહાફલમ્ ॥ ૨૩॥

તૃણદોષાણિ ક્ષેત્રાણિ દ્વેષદોષેયં પ્રજા ।
તસ્માદ્ધિ વીતદોષેષુ દત્તં ભવતિ મહાફલમ્ ॥ ૨૪॥

તૃણદોષાણિ ક્ષેત્રાણિ મોહદોષેયં પ્રજા ।
તસ્માદ્ધિ વીતમોહેષુ દત્તં ભવતિ મહાફલમ્ ॥ ૨૫॥

તૃણદોષાણિ ક્ષેત્રાણિ ઇચ્છાદોષેયં પ્રજા ।
તસ્માદ્ધિ વિગતેચ્છેષુ દત્તં ભવતિ મહાફલમ્ ॥ ૨૬॥

॥ ઇતિ તૃષ્ણાવર્ગઃ સમાપ્તઃ ॥

૨૫. ભિક્ષુવર્ગઃ પઞ્ચવિંશઃ

ચક્ષુષા સંવરઃ સાધુઃ સાધુઃ શ્રોત્રેણ સંવરઃ ।
ઘ્રાણેન સંવરઃ સાધુઃ સાધુઃ જિહ્વયા સંવરઃ ॥ ૧॥

કાયેન સંવરઃ સાધુઃ સાધુઃ વાચા સંવરઃ ।
મનસા સંવરઃ સાધુઃ સાધુઃ સર્વત્ર સંવરઃ ।
સર્વત્ર સંવૃતો ભિક્ષુઃ સર્વદુઃખાત્ પ્રમુચ્યતે ॥ ૨॥

હસ્તસંયતઃ પાદસંયતો વાચા સંયતઃ સંયતોત્તમઃ ।
અધ્યાત્મરતઃ સમાહિત એકઃ સન્તુષ્ટસ્તમાહુર્ભિક્ષુમ્ ॥ ૩॥

યો મુખસંયતો ભિક્ષુઃ મન્ત્રભાણી અનુદ્ધતઃ ।
અર્થં ધર્મં ચ દીપયતિ મધુરં તસ્ય ભાષિતમ્ ॥ ૪॥

ધર્મારામો ધર્મરતો ધર્મં અનુવિચિન્તયન્ ।
ધર્મમનુસ્મરન્ ભિક્ષુઃ સદ્ધર્માન્ન પરિહીયતે ॥ ૫॥

સ્વલાભં નાઽતિમન્યેત નાઽન્યેષ્યઃ સ્પૃહયન્ ચરેત્ ।
અન્યેષાં સ્પૃહયન્ ભિક્ષુઃ સમાધિં નાઽધિગચ્છતિ ॥ ૬॥

અલ્પલાભોઽપિ ચેદ્ ભિક્ષુઃ સ્વલાભં નાઽતિમન્યતે ।
તં વૈ દેવાઃ પ્રશંસન્તિ શુદ્ધાઽઽજીવં અતન્દ્રિતમ્ ॥ ૭॥

સર્વશો નામરૂપે યસ્ય નાઽસ્તિ મમાયિતમ્ ।
અસતિ ચ ન શોચતિ સ વૈ ભિક્ષુરિત્યુચ્યતે ॥૮ ॥

મૈત્રીવિહારી યો ભિક્ષૂઃ પ્રસન્નો બુદ્ધશાસને ।

અધિગચ્છેત્ પદં શાન્તં સંસ્કારોપશમં સુખમ્ ॥ ૯॥

સિઞ્ચ ભિક્ષો ! ઇમાં નાવં સિક્તા તે લઘુત્વં એષ્યતિ ।
છિત્ત્વા રાગં ચ દ્વેષં ચ તતો નિર્વાણમેષ્યસિ ॥ ૧૦॥

પઞ્ચ છિન્ધિ પઞ્ચ જહ્યે પઞ્ચોતરં ભાવય ।
પઞ્ચસંગાઽતિગો ભિક્ષુઃ ઓઘતીર્ણ ઇત્યુચ્યતે ॥ ૧૧॥

ધ્યાય ભિક્ષો મા ચ પ્રમાદઃ મા તે કામગુણે ભ્રમતુ ચિત્તમ્ ।
મા લોહગોલં ગિલ પ્રમત્તઃ મા ક્રન્દીઃ દુઃખમિદમિતિ દહ્યમાનઃ ॥ ૧૨॥

નાઽસ્તિ ધ્યાનમપ્રજ્ઞસ્ય પ્રજ્ઞા નાઽસ્ત્યધ્યાયતઃ ।
યસ્મિન્ ધ્યાનં ચ પ્રજ્ઞા ચ સ વૈ નિર્વાણાઽન્તિકે ॥ ૧૩॥

શૂન્યાગારં પ્રવિષ્ટસ્ય શાન્તચિત્તસ્ય ભિક્ષોઃ ।
અમાનુષી રતિર્ભવતિ સમ્યગ્ ધર્મં વિપશ્યતઃ ॥ ૧૪॥

યતો યતઃ સંમૃશતિ સ્કન્ધાનાં ઉદયવ્યયમ્ ।
લભતે પ્રીતિપ્રામોદ્યં અમૃતં તદ્વિજાનતામ્ ॥ ૧૫॥

તત્રાઽયમાદિર્ભવતીહ પ્રાજ્ઞસ્ય ભિક્ષોઃ ।
ઇન્દ્રિયગુપ્તિઃ સન્તુષ્ટિઃ પ્રાતિમોક્ષે ચ સંવરઃ ।
મિત્રાણિ ભજસ્વ કલ્યાણાનિ શુદ્ધાજીવાન્યતન્દ્રિતાનિ ॥ ૧૬॥

પ્રતિસંસ્તારવૃત્તસ્યાઽઽચારકુશલઃ સ્યાત્ ।
તતઃ પ્રામોદ્યબહુલો દુઃખસ્યાઽન્તં કરિષ્યતિ ॥ ૧૭॥

વર્ષિકા ઇવ પુષ્પાણિ મર્દિતાનિ પ્રમુઞ્ચતિ ।
એવં રાગં ચ દ્વેષં ચ વિપ્રમુઞ્ચત ભિક્ષવઃ ॥ ૧૮॥

શાન્તકાયો શાન્તવાક્ શાન્તિમાન્ સુસમાહિતઃ ।
વાન્તલોકાઽઽમિષો ભિક્ષુઃ ઉપશાન્ત ઇત્યુચ્યતે ॥ ૧૯॥

આત્મના ચોદયેદાત્માનં પ્રતિવસેદાત્મનાં આત્મના ।
સ આત્મગુપ્તઃ સ્મૃતિમાન્ સુખં ભિક્ષો વિહરિષ્યસિ ॥ ૨૦॥

આત્મા હ્યાત્મનો નાથઃ આત્મા હ્યાત્મનો ગતિઃ ।
તસ્માત્ સંયમયાત્માનં અશ્વં ભદ્રમિવ વાણિક્ ॥ ૨૧॥

પ્રામોદ્યબહુલો ભિક્ષુઃ પ્રસન્નો બુદ્ધશાસને ।
અધિગચ્છેત્ પદં શાન્તં સંસ્કારોપશમં સુખમ્ ॥ ૨૨॥

યો હ વૈ દહરો ભિક્ષુર્યુક્તે બુદ્ધશાસને ।
સ ઇમં લોકં પ્રભાસયત્યભ્રાન્ મુક્ત ઇવ ચન્દ્રમા ॥ ૨૩॥

॥ ઇતિ ભિક્ષુવર્ગઃ સમાપ્તઃ ॥

---

૨૬. બ્રાહ્મણવર્ગઃ ષડ્વિંશઃ

છિન્ધિ સ્રોતઃ પરાક્રમ્ય કામાન્ પ્રણુદ બ્રાહ્મણ ।
સંસ્કારણાં ક્ષયં જ્ઞાત્વાऽકૃતજ્ઞોऽસિ બ્રાહ્મણ ॥ ૧॥

યદા દ્વયોર્ધર્મયોઃ પારગો ભવતિ બ્રાહ્મણઃ ।
અથાऽસ્ય સર્વે સંયોગા અસ્તં ગચ્છન્તિ જાનતઃ ॥ ૨॥

યસ્ય પારં અપારં વા પારાપારં ન વિદ્યતે ।
વીતદરં વિસંયુક્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩॥

ધ્યાયિનં વિરજમાસીનં કૃતકૃત્યં અનાસ્રવમ્ ।
ઉત્તમાર્થમનુપ્રાપ્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૪॥

દિવા તપત્યાદિત્યો રાત્રાવાભાતિ ચન્દ્રમાઃ ।
સન્નદ્ધઃ ક્ષત્રિયસ્તપતિ ધ્યાયી તપતિ બ્રાહ્મણઃ ।
અથ સર્વમહોરાત્રં બુદ્ધસ્તપતિ તેજસા ॥ ૫॥

વાહિતપાપ ઇતિ બ્રાહ્મણઃ સમચર્યઃ શ્રમણ ઇત્યુચ્યતે ।
પ્રવ્રાજયન્નાऽऽત્મનો મલં તસ્માત્ પ્રવ્રજિત ઇત્યુચ્યતે ॥ ૬॥

ન બ્રાહ્મણં પ્રહરેત્ નાऽસ્મૈ મુઞ્ચેદ્ બ્રાહ્મણઃ ।
ધિગ્ બ્રાહ્મણસ્ય હન્તારં તતો ધિગ્ યસ્મૈ મુઞ્ચતિ ॥ ૭॥

ન બ્રાહ્મણસ્યૈતદ્ અકિઞ્ચિત્ શ્રેયો યદા નિષેધો મનસા પ્રિયેભ્યઃ ।
યતો યતો હિંસ્રમનો નિવર્તતે તતસ્તતઃ શામ્યત્યેવ દુઃખમ્ ॥ ૮॥

યસ્ય કાયેન વાચા મનસા નાऽસ્તિ દુષ્કૃતમ્ ।
સંવૃતં ત્રિભિઃ સ્થાનૈઃ તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૯॥

યસ્માદ્ ધર્મં વિજાનીયાત્ સમ્યક્-સંબુદ્ધ-દેશિતમ્ ।
સત્કૃત્ય તં નમસ્યેદ્ અગ્નિહોત્રમિવ બ્રાહ્મણઃ ॥ ૧૦॥

ન જટાભિર્ન ગોત્રેણ ન જાત્યા ભવતિ બ્રાહ્મણઃ ।

યસ્મિન્ સત્યં ચ ધર્મસ્ચ સ શુચિઃ સ ચ બ્રાહ્મણઃ ॥ ૧૧॥

કિં તે જટાભિઃ દુર્મેધઃ ! કિં તેઽજિનશાટ્યા ।
આભ્યન્તરં તે ગહનં બાહ્યં પરિમાર્જયસિ ? ॥ ૧૨॥

પાંશુકૂલધરં જન્તું કૃશં ધમનિસન્તતમ્ ।
એકં વને ધ્યાયન્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૩॥

ન ચાહં બ્રાહ્મણં બ્રવીમિ યોનિજં માતૃસંભવમ્ ।
ભો વાદી નામ સ ભવતિ સ વૈ ભવતિ સકિઞ્ચનઃ ।
અકિઞ્ચનમનાદાનં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૪॥

સર્વસંયોજનં છિત્ત્વા યો વૈ ન પરિત્રસ્યતિ ।
સંગાતિગં વિસંયુક્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૫॥

છિત્વા નન્દિં વરત્રાં ચ સન્દાનં સહનુક્રમમ્ ।
ઉત્ક્ષિપ્તપરિઘં બુદ્ધં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૬॥

આક્રોશન્ વધબન્ધં ચાદુષ્ટો યસ્તિતિક્ષતિ ।
ક્ષાન્તિબલં બલાનીકં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૭॥

અક્રોધનં વ્રતવન્તં શીલવન્તં અનુશ્રુતમ્ ।
દાન્તમન્તિમશારીરં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૮॥

વારિ પુષ્કરપત્ર ઇવારાગ્રે ઇવ સર્ષપઃ ।
યો ન લિપ્યતે કામેષુ તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૧૯॥

યો દુઃખસ્ય પ્રજાનાતીહૈવ ક્ષયમાત્મનઃ ।
પન્નભારં વિસંયુક્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૦॥

ગંભીરપ્રજ્ઞં મેધાવિનં માર્ગામાર્ગસ્ય કોવિદમ્ ।
ઉત્તમાર્થમનુપ્રાપ્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૧॥

અસંસૃષ્ટં ગૃહસ્થૈઃ અનાગારૈશ્ચોભાભ્યામ્ ।
અનોકઃસારિણં અલ્પેચ્છં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૨॥

નિધાય દણ્ડં ભૂતેષુ ત્રસેષુ સ્થાવરેષુ ચ ।
યો ન હન્તિ ન ઘાતયતિ તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૩॥

અવિરુદ્ધં વિરુદ્ધેષુ આત્તદણ્ડેષુ નિર્વૃતમ્ ।
સાદાનેષ્વનાદાનં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૪॥

યસ્ય રાગશ્ચ દ્વેષશ્ચ માનો મ્રક્ષશ્ચ પાતિતઃ ।
સર્ષપ ઇવાऽऽરાગ્રાત્ તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૫ ॥

અકર્કશાં વિજ્ઞાપનીં ગિરં સત્ત્યામુદીરાયેત્ ।
યથા નાऽભિષજેત્ કિઞ્ચિત્ તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૬ ॥

ય ઇહ દીર્ઘં વા હૃસ્વં વાऽણું સ્થૂલં શુભાऽશુભમ્ ।
લોકેऽદત્તં નાદત્તે તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૭ ॥

આશા યસ્ય ન વિદ્યન્તેऽસ્મિન્ લોકે પરસ્મિન્ ચ ।
નિરાશયં વિસંયુક્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૮ ॥

યસ્યાऽऽલયા ન વિદ્યન્ત આજ્ઞાયાऽકથંકથી ।
અમૃતાવગાધમનુપ્રાપ્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૨૯ ॥

ય ઇહ પુણ્યં ચ પાપં ચોભયોઃ સંગં ઉપાત્યગાત્ ।
અશોકં વિરજં શુદ્ધં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૦ ॥

ચન્દ્રમિવ વિમલં શુદ્ધં વિપ્રસન્નમનાવિલમ્ ।
નન્દીભવપરીક્ષીણં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૧ ॥

ય ઇમં પ્રતિપથં દુર્ગં સંસારં મોહમત્યગાત્ ।
તીર્ણઃ પારગતો ધ્યાય્યનેજોऽકથંકથી ।
અનુપાદાય નિર્વૃતઃ તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૨ ॥

ય ઇહ કામાન્ પ્રહાયાऽનાગારઃ પરિવ્રજેત્ ।
કામભવપરિક્ષીણં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૩ ॥

ય ઇહ તૃષ્ણાં પ્રહાયાऽનાગારે પરિવ્રજેત્ ।
તૃષ્ણાભવપરિક્ષીણં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૪ ॥

હિત્ત્વા માનુષકં યોગં દિવ્યં યોગમુપાત્યગાત્ ।
સર્વયોગવિસંયુક્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૫ ॥

હિત્ત્વા રતિઞ્ચારતિઞ્ચ શીતીભૂતં નિરૂપધિમ્ ।
સર્વલોકાऽભિભુવં વીરં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૬ ॥

ચ્યુતિં યો વેદ સત્ત્વાનાં ઉપત્તિં ચ સર્વશઃ ।
અસક્તં સુગતં બુદ્ધં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૭ ॥

યસ્ય ગતિં ન જાનન્તિ દેવ-ગન્ધર્વ-માનુષાઃ ।
ક્ષીણાસ્રવં અર્હન્તં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૮॥

યસ્ય પુરશ્ચ પશ્ચાચ્ચ મધ્યે ચ નાઽસ્તિ કિઞ્ચન ।
અકિઞ્ચનમનાદાનં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૩૯॥

ઋષભં પ્રવરં વીરં મહર્ષિં વિજિતવન્તમ્ ।
અનેજં સ્નાતકં બુદ્ધં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૪૦॥

પૂર્વનિવાસં યો વેદ સ્વર્ગાપાડયં ચ પશ્યતિ ।
અથ જાતિક્ષયં પ્રાપ્તોઽભિજ્ઞાવ્યવસિતો મુનિઃ ।
સર્વવ્યવસિતવ્યવસાનં તમહં બ્રવીમિ બ્રાહ્મણમ્ ॥ ૪૧॥

॥ ઇતિ બ્રાહ્મણવર્ગઃ સમાપ્તઃ ॥

॥ ઇતિ ધર્મપદં સમ્પૂર્ણમ્ ॥

Digitized by a team of volunteers working for http://malayalamebooks.org
The book is available at
http://www.archive.org/details/Dhammapada_Pali_Sanskrit_Hindi_by_Rahul_Sankrityayan

1. Link for Dharmapada stories for each verse

http://www.thisismyanmar.com/nibbana/dhammapada/dmpadatm

2. Link for English Translation from Myanmar

http://www.thisismyanmar.com/nibbana/dhammapada/versestm

3. OR below is a consolidated link for both verse and story adopted
from the above links. .

http://www.tipitaka.net/tipitaka/dhp/index.php

---

*Dharmapadam Sanskrit*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*